नमेकलांत्वपुण्यस्यफलमेतेद्देवनायक॥७८॥तस्यतद्वचनंश्रुत्वातमिंद्रःप्रसुवाचह॥नज्ञानासि
महाराजएषांपुण्यप्रमावकं॥७९॥सर्वानिमांस्थिरस्त्वंसर्वप्रमोहसमन्वितः॥स्वप्रज्ञासांतया
पुण्यंवदंसपारमेयमां॥८०॥तेनतेपुण्यमुग्रंतंसर्वंनष्टंनराधिप॥पतस्वत्वंमहीपृष्ठेपुनः
पुण्यंसमाचर॥८१॥ततःपपातभूपृष्ठेययातिर्दुःखसंयुतः॥[illegible]तंपतंतंचदे
वित्रादर्दृशुःसाविमुक्त्यर्कः॥८२॥मातामहंचविज्ञायदद्दुःपुण्यंपुनःस्वकं॥तेनस्वर्गस्थि
तोयत्रास्मुमोदद्देवतास्वयं॥८३॥ततस्तंनारदोयोगीज्ञगादकरुणायुतः॥ त्वयाविघ्नामहा
राजप्राप्तःपुण्यविनाशकृत्॥८४॥विघ्नेशंभक्तराजंस्त्वंमंत्रेस्थानंदुगस्ततःभविष्यसिनसं
देहोनात्रहूमौपतिष्यसि॥८५॥ततस्तेनगणेशास्यमंत्रोदत्तोदनाप्सरः॥तंजजापययाति
श्चगणेशध्यानतत्परः॥८६॥पुण्यक्षयेसराजेंद्रःशुक्रगयाप्रजापते॥गणेशाप्रययौभक्त्या

॥सौ॰ गाणपत्यो महायशाः ॥८७॥ ययातेश्चरितं पुण्यं संक्षेपेण निरूपितं ॥ शृण्वते कामदं पूर्वं भवि ॥न०॥
८६ ष्यति न संशयः ॥८८॥ इति श्रीमद्दैसैमो हृ०त०म० ययातिचरितनामेकत्रिंशोध्यायः ॥३१॥
सु॰ हृ॰॥ यदोरप्यभवन्पुत्राश्चत्वारो देवसन्निभाः ॥ सहस्रजित्तथाल्पष्टस्ततः पुत्रोऽभवद्
नातक्षिन्नाम विख्यातस्तस्य पुत्रास्त्रयोभवन् ॥ हैहयश्च हयश्चैव वपुर्हयस्तदादृतः ॥२॥
हैहयस्याभवत्पुत्रो धर्मद्दयाभिविश्रुतः ॥ तस्य पुत्रोऽभवत्कुंतिः साहंजिस्तत्सुतः स्मृतः ॥३॥
साहंजेरभवत्पुत्रो महिष्मान्नाम पार्थिव ॥ माहिष्मतीन्तु नगरी वासितायेन भूभुजा ॥४॥
तस्य पुत्रो भद्रसेनो दुर्दमस्तत्सुतस्तजः ध नकश्चापरो धीमान्मुख्यो बभूव पार्थिवः
धनकादभवन्पुत्राश्चत्वारो लोकविश्रुताः ॥ कृतवीर्यः कृताग्निश्च कृत वर्मा ततः स्मृतः ॥५॥ ८६॥
कृतौजाश्च तथा दृक्षस्तत्र श्रेष्ठः प्रतापवान् ॥ बभूव दानशीलश्च बल वीर्यो महीपतिः ॥६॥

तेनैव पृथिवीमध्ये चतुर्थीव्रतहेतवे गापरा ॥ प्रकाशिता प्रलापश्च स्वर्गमाहिष्मिस्थप्रदा ॥ ८ ॥
ऋष्यस्तु वाच ॥ कथं तेनन पालनेन चतुर्थी भूमिमंडले ॥ संमानिता महायोगी न्वदन स्वचरि
त्रकं ॥ ९ ॥ श्रुत्वा कथामतं स्वामिन् हर्षनिर्भर तमिवर्द्धता ॥ अतो विस्तरभावेन कथयस्व क
थानकं ॥ १० ॥ सूत उवाच ॥ माहिष्मत्यां महापुर्यां सोमनामा भवत्पुरा ॥ अंत्यजो द्रव्यलु
ब्धश्च पापकर्मपरायणः ॥ ११ ॥ स तु मार्गे जनान्नित्यं पीडयामास यत्ततानदिने दिने ॥ मांसविक्र
यकारी च पश्चन् हत्वा निरंतरं ॥ १२ ॥ एकदा माघमासस्य चतुर्थी कृष्णपक्षगा ॥ समागत्य
तत्रासौ विचचार वनांतरे ॥ १३ ॥ महापर्वतदेशं स जनानां प्रवधाय च ॥ प्रययौ दैवयोगे
न मिलितं तत्र किंचन ॥ १४ ॥ अन्नं फलं विहीनो यं वश्यामलोभसंयुतः ॥ मिलितं तत्र नो
किंचित्तथा मतश्च वारहा ॥ १५ ॥ ततो सायंसमागमं सूर्यस्तं दृष्ट्वा च यदृच्छमति ॥ गमनाय तं

।।मै०।। पावकेमार्गसंस्थो बभूव ह ।।१६।। मार्गे ह्रिषोद्विजास्तत्र दृष्ट्वा हृदेनासंख्यकान् ।। तान् ।।त०।।
८१।। हत्वास तद्वीर्यं वैरघ्नी बालग्रहं ययौ ।।१७।। वैद्रांद्देय ततः प्राप्तं भुजे भोजनाकुलं ।। पुत्रं गणे
शानामानमाहूयामास तेन सः ।।१८।। कदं दुष्टं पुनस्तात् हस्यकारपापमुत्वगं कस्य पस्तव
तुष्ट्यं सिममास्वादये विधाः ।।१९।। तत्र गतैस्तु ताहृताम्लामानिनं तं प्रसमाययुः ।। कैलासा
गोपस्थानेनि सुस्तं ते विमानगं ।।२०।। स्वर्गमार्गेषु देवैश्च ब्रह्मविष्णुदिभिः स्तुतः ।। वि
मानगैः स्तूयमानः सप्रविवेश ।। शिवास्पदं ।।२१।। तत्र भुक्त्वा स भोगान् स पपात पृथिवी
तले ।। माहिष्मत्यां सुतो जज्ञे धनकस्य महाबलः ।।२२।। कृतवीर्य इति ख्यातो नानाधर्म
परायणः ।। देवविप्रातिथिप्रेम्णु बंभुवयत्नकारकः ।।२३।। जपुत्रः सोऽभवत्तानाकृत ।।८६।।
वीर्यः प्रतापवान् ।। पुत्रार्थं यतते सोऽतं नानाधर्मपरायणः ।।२४।। न लेभे संततिं राज्ञा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ततो नितुरलसंयुतः। प्रधानेषु समास्थिष्वारास्यं निहतकंटकं॥२५॥ सपत्नि कोवनं राज्ञा यथो
तपसि संस्थितः। पूर्वसंस्कारयोगेन गणेशप्रीतिमानभूत्॥२६॥ नानातपःप्रकारा सौत
था पि संततिर्नृपः॥ नैव लेभे च प्रज्ञानाथ नेत्रमात्रावशेषितः॥२७॥ अस्थित्वचा समायुक्तं
दृष्ट्वा तं नारदो मुनिः। स्वर्गस्थ धनकं तत्रस्त तांत्त मवदन्नृपं॥२८॥ न च पुत्रो वने संस्थः पु
त्रार्थं यतते नृपः॥ नानायत्नसमायुक्तो अस्थित्वचायुतो भवत्॥२९॥ न लेभे संततिं रा
जा स्वस्य काले मरिष्यति॥ पुत्रहीनस्य भो राजन् कागतिः प्रभवेद्दृढ॥३०॥ इत्युक्त्वांतं मु
नींद्रं स यथोकेला समादृतः॥ धनेकोमन सा सं तं विचारमकरो च्च तनः॥३१॥ ब्राह्मणां
नारदं च पि सर्वज्ञं तेन स्वनिर्नितं॥ भविष्य तिन संदेह स्ततः सोपि यथोविधि॥३२॥ प्रति
पश्यन्तु ष्टाव नानास्तोत्रैः प्रजापतिं॥ ७ वाम्यक्तं महाभागं विनयेन समन्वितः॥३३॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥गौ०॥ धनकतं०॥धर्मशीलस्य मे पुत्रः पुत्रहीनो बभूव ह॥पुत्रार्थं यतते ब्रह्मन् नानातपःपरायणः ॥व्र०॥
८८ राज्यादिकं समुत्सृज्य वनेषु संस्थितोऽपि ते॥तपस्तेनाचरो घोरो सावस्थिचर्मवितो बभौ॥
केनोपायेन पुत्रस्य भवतीति वदस्व मे॥प्रापयिष्याम्यहं तत्र स्ववंशस्य विवृद्धये॥२६॥
तदास्तं प्रसुवान्वे देवः चनं चानुपानतः॥पूर्वजन्मनि संभूतं छिद्रं पुत्र तस्साधनं॥२७॥पु
नः प्रोवाच स तं देवो विधिं सर्वार्थकोविदः॥पुत्रप्राप्तयमिदं कमुपायं सर्वसिद्धिदं॥२८॥
ज्ञातानेन व्रतं तेन कृतं संकष्टहारकं॥चतुर्थीप्रभवं तस्य पापं सर्वं लयं गतः॥२९॥सा
हाय्यपानि न स्यंति संकष्टीव्रतसाधनात्॥संकष्टे व्रतसंभूते दिवसे य कृतं भवेत्
तदेवास्य भावेन तिष्ठति नात्र संशयः॥चतुर्थ्यां प्रियवल्लभायां पुण्यमेवसमा
चरेत्॥३०॥तव पुत्रेण यातेऽहं दृष्टाहं नाज्ञाधरणोहताः॥चतुर्थ्यां पूर्वजन्मस्थेन ॥८८॥

पापं तस्मिन्कृतं महत्॥७३॥ नानातपःप्रभावेणान्यतीर्थादिकेन च॥ यत्नादपि प्रनष्टं तत्पापं त्वयं नै
व गमिष्यति॥७४॥ संकष्ट्यां यत्कृतं पापं वज्रलेपं च तत्स्मृतं॥ तत्र किंचिदुपायेन तथापि शृणु
मे वच॥७५॥ येन संकष्टिका पुण्या चतुर्थी साधिता नृप॥ तस्य जन्मादिकं नैव संभविष्यति का
र्यपुनः॥७६॥ चतुर्विधं प्रजानीहि सर्वं मायामयं जगत्॥ संकष्टं च जीवानां तेन युक्ता
भ्रमंति ते॥७७॥ चतुर्थी गणनाथस्य संकष्टी साधिता यदा॥ तस्य चतुर्विधं कष्टं न प्रभवेत्
दा च न॥७८॥ ब्रह्मणि ब्रह्मभक्तो तस्यानंदे यायाति नरः॥ अंतस्येव प्रभावेण ब्रह्मलोके सुखमा
प्नुयात्॥७९॥ चतुर्थ्यां पापकारी ये तेषां मुक्तिर्न विद्यते॥ पापयुक्तास्तया राजन्नस्वर्गस्थि
ता भवंति ते॥७९॥८०॥ पुनर्जन्म धराभूमौ तत्र पापफलं स्वकं॥ भुंजंति च पुनस्ते गणप
या भवंति ते॥८०॥ अतो गणेनादृतेः सर्वे लोकास्तद्व्यापिनो नराः॥ पापभोगार्थमेवं च तत्र वु

॥मौ० त्रोधुना भवेत् ॥५१॥ चतुर्थ्यां यत्कृतं पापं चतुर्थी हंति तत्सदा ॥ तदर्थं तिसुतोराजंश्चतुर्थी समच ॥८०॥
८९ रिष्यते ॥५२॥ तदा पापविहीनोयं भविता नात्र संशयः ॥ कुत्र युक्तश्च ते पुत्रो भविष्यति महाम
ते ॥५३॥ अपराधयुतैः कर्मभूतं नाशार्थमादरात् ॥ दूरितस्य महापुण्यं कर्तव्यं तेन नृपति ॥
चतुर्थ्यां महीमानं तत्स्यात्पितृहीनं भवं ॥ पापं क्रोधसमायुक्ता हंति मत्स्यक्रमेण सा ॥ अतो ब्र
ह्मपापार्थं संकष्टा ह्यत्र नीभवेत् ॥ तदा दूरं त्यक्त्वा पापं गमिष्यति दिनत्रये ॥५४॥ ततस्त्वं
करुणायुक्तः स विचंद्र नामा स्मरत ॥ कथयस्व महासेन सर्वज्ञ पयोराज प्रणम्य तं ॥५५॥ इति श्री
महांतेमो स्कं० तं० म० ॥ धनकन्तोपदेशो नाम द्वात्रिंशोध्यायः ॥३२॥ मुद्गल उवाच ॥
कृतं लब्ध्वा ससंतिरवतपुत्रकं गुणशालिनमायया ॥ धनकः कृतवीर्यस्य दृष्ट्वा प्रेम सद्यो जगाम ह ॥१॥
न धनकं पितरं दृष्ट्वा कृतवीर्यो नितान्तमतां ॥ पुत्रं राज्ञा समादाय तोषं गतस्तु हाप्यतः गामदत्तां ॥२॥ धन ॥८९॥

कंठ वाम॥ पुत्रनाना विधायताःकृतास्तया विशेषतः॥ पुत्रार्थमधुनैकं त्वं ममात्तया त्व
तं कुरु॥३॥ तेन पुण्येन पुत्रस्ते तव विताना त्रसंशयः॥ ब्रह्मलोकपितिंमेत दृष्टागतस्य
पुस्तकं॥४॥ इत्युक्त्वा पुत्रहस्ते तदत्वा पुस्तकमादयत॥ अंतर्दुर्निंयमोराज्ञा तन्नाग
रन्नपास्तत्र॥५॥ पुस्तकं हस्तगं दृष्ट्वा विस्मितोभूत्महर्षितः॥ पितरं दृष्ट्वा खिन्नोभूत्ता
सस्मारसस्तोदैवे॥६॥ ततः सपत्निकोराजा कृतवीर्योनिगामह॥ स्वपुरं मानि नस्ता
त्रमयानादिभिर्याददरात्ता॥७॥ ततः सब्राह्मणानाहूतासमाकार्यनिनामतान॥ पुस्त
कं दर्शयामास तस्यार्थे ब्राह्मणा जगुः॥८॥ अत्रोयन्माहात्मागपुस्तकेवृत्तमुत्त
मं लिखितं सर्वसंकष्टहारकं सर्वदं परं॥९॥ कृष्णपक्षेस्वतुर्थ्यां वैचंद्रोदये समागते
पूजनीयो विशेषेण गणेशः सिद्धिदायकः॥१०॥ पूजयित्वा गणाधीनां ततोर्घ्यं स्ति

॥ मौ० ध्यायेन्नृप॥ गणेशाय च चंद्राय दातव्यो व्रतकारिणा॥११॥ सर्वेंद्रियासमारभ्य गणेशास्मर ॥ ८० ॥
९० णेनृप॥ कर्तव्यं वर्जयेत्तत्र जलपानादिकं तथा॥१२॥ चंद्रायार्घ्यं ततो दत्वा सहस्रवारं नवोत्तम
तत्रश्च ब्राह्मणान् पंचसपत्निका नेमसतान्॥१३॥ भोजयेत्परमान्नेन मोदकादिभिरादरा
त्॥ पायसेन शर्करया घृतेन मधुरेण वा॥१४॥ ततः स्वयं सुहृद्भिश्च भोजनं वै समाचरेत्॥
दानं दद्याद्विप्रेभ्यो योषिद्भ्यः कंचुकादिकं॥१५॥ ततो जागरणं कार्यं गीतवाद्यस्तवेन
च॥ प्रभाते विमले स्नात्वा पूर्ववत्पूजयेद्विभुं॥१६॥ गणेशं च ततो विप्रान् भोजयेद्रव्यव
न्नृप॥ दक्षिणां पुष्कलां तेभ्यो दापयेतान्नमंत्रप॥१७॥ मासेमासे प्रकुर्यात्स्वं व्रतं गणेशस्य
संविदं॥ सदा संकष्टहीनस्या [illegible] तेस्वानंदगो भवेत्॥१८॥ अपारमहिमा पुत्रकं व्रतं प्रा
प्तं लभान्नृप॥ तदीयसंगयोगेन तत्र स्यैः सिद्धिदं भवेत्॥१९॥ न शक्नुवंति वक्तुं वक्तुं लोका ॥ ९० ॥
तं०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सं२

पिमपिप॥ लोकानामुपकाराय भविष्यति विनोषतः॥२०॥ चतुर्विधं जगत्सर्वं कंटकं मुच्यते॥
तस्माद्दुःखनदीनार्थं व्रतमिदं भविष्यति॥२१॥ इह भुक्त्वाखिलान्भोगान्दुर्लभान्देवभो
क्लि२ ग्यकान्॥ अंते मुमवाप्नोति व्रतस्यास्य प्रसादतः॥२२॥ एवमुक्त्वा द्विजाः सर्वे गिताः स्वस्वा
श्रमे ता हा॥ कार्तवीर्यस्तथा राजा चकार व्रतमुत्तमं॥२३॥ सूत उवाच॥ मुद्गलस्य वचः
श्रुत्वा हृष्टो यमाप्य नापतिः॥ जगाद तं पुनर्वाक्यं संशयोच्छेदनाय सः॥२४॥ [redacted] य५
[redacted] द्र सूत उवाच॥ कार्तवीर्यो हि मारभ्य व्रतं भव्यं समागतं॥ सामान्नाम्नां
सजेनैव कृतं कथं महामुने॥२५॥ चतुर्थीव्रतपुण्येन सेवक तवीयकिः॥ वंशवर्णि
तं विप्र तया संशयदायके॥२६॥ अतः संशयनाशार्थं वद मुद्गल मे वचः॥ सर्वज्ञस्त्वं
क्षा१ न संदेहः सोद्योगी श्वरो महान्॥२७॥ मुद्गल उवाच॥ प्रजापतेश्च पाहस्त्र वचनं मे मया

ष्य०

मो० मते॥येनतेसंशयोनाशंगमिष्यति नसंशयः॥२८॥व्रतंगाणेश्वरंह्यस्यचतुर्थीसंज्ञकंपरं॥संकष्टहर त्र
९१ यां-२ णंप्रोक्तंजानीहितसुराननं॥२९॥पृथिव्यांस्वर्गसिद्धिलेचपातालेसर्वसंमतं॥चतुर्थीचसमुत्पन्ना
नदारभ्यप्रतिष्ठितं॥३०॥जनास्तन्नैवजानंतिपृथिव्यांकुत्रचित्प्रभो॥कृतवीर्याच्चसर्वत्रप्रकाश
मगमद्भुतं॥३१॥एतत्तेसर्वमाख्यातंशृणुतस्यकथानकं॥कृतवीर्यस्यभूपस्यपुण्यदंशृणुएव
तेभवेत॥३२॥छ॥इतिश्रीमहासेमोद्गले०पु०म०कृतवीर्यव्रतप्राप्तिवर्णनंनामत्रयत्रिंशो
त्र४ ध्यायः॥३३॥छ॥मुद्गलउवाच॥वर्षमात्रंव्रतेनैवगतंपापंलयंमहत्॥द्वादशाब्दस्यहत्याख्यंतत्रोरा
जायभोविधे॥१॥व्रतपुण्यप्रभावेणससहाभूनृपांगना॥सुषुवेशुभवेलायांपुत्रंतेजस्विनांवर ॥६१॥
रं॥हस्तपादविहीनंतंदृष्ट्वामाताररोदह॥कृतवीर्यस्तथासर्वैःप्रधानैर्बोधितोभवत्॥३॥सहका
शोकंस्वपंराजाचकारक्तालकमवि॥महास्तवयुतंसर्वैर्नगरेसंस्थितोभवत्॥४॥रात्रौस्वप्नेदद

श्रसौ दत्तात्रेयं च योगिनं ॥ तेन यत्कथितं स्वप्ने तच्छृणुष्व प्रजापते ॥ ५ ॥ द्वादशे गतवर्षेषु पुत्रस्य
ते नृपोत्तम ॥ आगमिष्यामि ते गेहं सांगं पुत्रं करोम्यहं ॥ ६ ॥ मा चिंतां कुरु राजेंद्र गणनाथप्रसाद
नः पुत्रोयं ते सुतेजस्वी देवमान्यो भविष्यति ॥ ७ ॥ ततः सोंतर्दधे योगी दत्तात्रेयस्तथा नृप ॥ प्रबु
द्धो हर्षयुक्तः सन् भूव गणपं स्मरन् ॥ ८ ॥ ततस्तेन पृथिव्यां तु घोषः सर्वत्र कारितः ॥ चतुर्थ्यां शुक्ल
पक्षस्य व्रतं कार्यं जनैः सदा ॥ ९ ॥ येन व्रतमिदं नैव कृतं चेत्तं निहन्म्यहं ॥ चंडालादिद्विजांतास्ते च
क्रुर्व्रतं विशेषतः ॥ १० ॥ अष्टवर्षसमायुक्ता नरा नार्यः स्म मानद ॥ अकुर्वन् विधिवत्सर्वत्र
तं गणेश्वरं महत् ॥ ११ ॥ तस्य राज्ये नरः कोपि दुःखयुक्तो न भूवन ॥ नवं व्याधिभयं न दुरोगादि
कभयं नहि ॥ १२ ॥ ततो द्वादशवर्षेषु गतेषु स जगाम ह ॥ दत्तो योगी द्रुसेव्यश्च तं ननाम नृपाधि
पः ॥ १३ ॥ पूजितो भोजितस्तेन दत्तस्तमब्रवीद्वचः ॥ पुत्रं दर्शय ते राजन्नहं द्रष्टुमागतः ॥ १४ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो०
९२

ततः संहर्षितो राजा दृष्ट्वा पुत्रं च तत्करे ॥ उत्संगे गृह्य योगींद्रो राजानं प्रत्युवाच ह ॥१५॥ राजन्ननेन तया रा०
पातोंगहीनस्त्वमजानता ॥ कृतं तु तेन ते पुत्रोंगहीनः प्रबभूव ह ॥१६॥ अतस्य जागरे राजन् जृंभितं च
पुनः पुनः ॥ नावमननं तस्यात्र कृतं तेनायमीदृशः ॥१७॥ अतस्यायं प्रभावेण विष्णुः साक्षान्नराकृ
तिः ॥ पुत्रो भवत्त्वदंशेन विख्यातः प्रभविष्यति ॥१८॥ ततः एकाक्षरं मंत्रं दत्तौ तस्मै महामुनिः ॥ वि
धिपूर्वं गणेशस्य कार्त्तवीर्याय धीमते ॥१९॥ अनुष्ठानं समादिश्य ह्यादृशाद्ध मयप्रभुः ॥ अंतर्द्धा
नं च कारासौ राजा संहर्षितो भवत् ॥२०॥ प्रवालक्षेत्रसान्निध्ये वने व्याघ्रादिसंयुते ॥ पुत्रं संस्थाप्य
जने राजा दुःखितश्च बभूव ह ॥२१॥ ततश्च कार्त्तवीर्येण तपस्तप्तं सुदारुणं ॥ वायुमात्राशनेनैव ध्या ॥९२॥
त्वा हृदि गजाननं ॥२२॥ मंत्रं जजाप मोदक्षहस्त्रपार विवर्जितः ॥ देहभावमतिक्रम्य संस्थितः काष्ठ
वद्भूमौ ॥२३॥ तस्य तपः प्रभावेण वने निर्वैरभावतः ॥ प्राणिनः संचरंति स्म गजसिंहादयः सदा ॥२४॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवंद्वादशवर्षाणि गता निजपत्नोर्यदा॥नंतनंदाय योदुंढिर्भक्तं परमभाविकं॥२५॥नडागमध्य
भागात्तं निःसृतं गणपं नृपः॥दृष्ट्वाननाम विघ्नेशं पुष्ट्यभक्तिसंयुतः॥२६॥ हर्षेणमहतायुक्त
स्तुष्टावतं गजाननं॥सरोमांचो महावीरः कार्तवीर्यो महायशाः॥२७॥कार्तवीर्यउ०॥नमस्तेग
णनाथाय विघ्नेशाय नमोनमः॥विनायकाय देवेश सर्वेषां पतये नमः॥२८॥निर्गुणाय परे
शाय परात्परतराय वै॥अनादये च सर्वादि पूज्याय तेनमोनमः॥२९॥सर्वपूज्याय देवेंद्रदीन
पालाय तेनमः॥ब्रह्मणे ब्रह्मणांचैव ब्रह्मदात्रेनमोनमः॥३०॥निराकाराय साकाररूपाय पर
मात्मने॥योगाय योगदात्रे ते शांतिरूपाय वैनमः॥३१॥सदाज्ञानघनायैव कर्ममार्गमवर्तिने
॥आनंदाय सदानंदाकं देहरूपाय तेनमः॥३२॥रजसा सृष्टिकर्त्रे ते सत्वेन पालकाय च॥तामसेन
च संहर्त्रे गुणेशाय नमोनमः॥३३॥नानामायाधरायैव नानामाया विवर्जिता॥मायिभ्यो मोहदा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मै०
६२

त्रैवै मायेमायिकेतेनमः॥३४॥ स्वानंदपतये तुभ्यं सिद्धिबुद्धिवराय च॥ सिद्धिबुद्धिप्रदात्रे च लंबोद १०
रने मास्तुते॥३५॥ किं स्तौमि गणनाथ [illegible] थतां यत्र वेदा विसिस्मिरे॥ शिवविष्ण्वादयश्चैव योगिनो
योगरूपिणं॥३६॥ ततस्तुष्टो गणनाथस्तु जगाद भक्तमुत्तमं॥ वरं वृणु महाभाग कार्तवीर्य मनेप्सि
तं॥३७॥ त्वया कृतं मदीयं यत्स्तोत्रं सर्वप्रदं भवेत्॥ अंगहीनस्य सर्वस्य सांगदं प्रभविष्यति॥३८॥
मम प्रजांते भावेन नरः स्तोत्रमिदं पठेत्॥ तस्य सांगं सदा सर्वं करोमि स्तोत्रपाठतः॥३९॥ इह भु
क्त्वाखिलान् भोगान् पुत्रपौत्रादिसंयुतः॥ अंते स्वानंदगो भूत्वा ब्रह्मभूतो भविष्यति॥४०॥ ततस्तं
कार्त्तवीर्यश्च जगाद गणनायकं॥ हर्षयुक्तो महाभक्तो भक्तेशं भक्तवत्सलः॥४१॥ कार्तवीर्य उ० ॥६३॥
किं वृणोमि गणाधीश सर्वं मायामयं विभो॥ तव दर्शनमात्रेण मया ज्ञातं न संशयः॥४२॥ तदपि
सुहृदां स्वामिन् संतोषार्थं वृणोम्यहं॥ शरीरे चारुतां देहि भक्तिं त्वच्चरणे प्रभो॥४३॥ यं यमिच्छामि

नतं च सफलं मे गजानन ॥ भवतु त्वत्प्रसादेन राज्यं पूर्णं प्रदेहि च ॥४४॥ अस्मिन्क्षेत्रे स्थिरा भूत्वा म
त्कान्यालय विघ्नप ॥ धर्मार्थकाममोक्षाणां ब्रह्मभूत परं कुरु ॥४५॥ प्रवालमयरूपेण मया दृष्टो
गजानन ॥ प्रवालक्षेत्रमित्युक्तं नाम्ना भवतु नित्यदा ॥४६॥ सदा विजयसंयुक्तं सहस्रभुजसंयुतं ॥
मां कुरुष्व दयासिंधो विष्णुतुल्यपराक्रमं ॥४७॥ मदीयसेवनं देव देवेव वश्यं सदा भवेत् ॥ मंत्रादि
कं तु मे नाथ भवतु त्वत्प्रसादतः ॥४८॥ मदीयस्मरणेनैव गतं प्राप्तं कुरु प्रभो ॥ नमस्य मंत्रि लोकेषु
सेंद्रादिषु भवेत्किल ॥४९॥ ततस्तं गणनाथः स तथेति प्रत्युवाच ह ॥ सर्वं ते भविता राजन्मत्प्र
सादान्न संशयः ॥५०॥ मदीयस्मरणेनैव मंत्रादीनां प्रसेवया ॥ निर्विघ्नं ते च राजेंद्र भविष्यति निरंत
रं ॥५१॥ एवमुक्त्वा गणेशानस्तत्रांतर्द्धानं जगाम ह ॥ ततस्तस्य प्रजानाथदेहः सांगो बभूव ह ॥५२॥
सहस्रभुजसंयुक्तो बभूव यादसंयुतः ॥ महाबलो महावीर्यस्तेजसा संयुतो भवत् ॥५३॥ घोरस्ते

मो०
९५

तत्र देवा द्वयो जग्मुर्दर्शनार्थं नृपस्य च ॥ साक्षाद्विष्णुः कलांशेन कर्त्तवीर्यो बिभो नृप ॥ ५४ ॥ ततस्ते नृ०
न द्विजैः सार्द्धं स्थापिता मूर्तिरादरात् ॥ गणेश्वरस्य तां राजा पुपूज भक्तिसंयुतः ॥ ५५ ॥ पूजार्थं ब्रा
ह्मणांस्तत्र स्थापयामास भूमिपः ॥ ततो देवान् द्विजांस्तत्र पुपूज स यथाविधि ॥ ५६ ॥ ततनामय
ति. पुत्रस्तां स्ते पितस्यैव रानददुः ॥ हर्षितास्ते पुनः स्वर्गं जग्मुर्देवाः सवासवाः ॥ ५७ ॥ कार्त्तवी
र्यो रथस्थः स ययौ स्वनगरं ततः ॥ दृष्ट्वैतं हर्षितास्तत्र तां तं नययुः सर्वनागराः ॥ ५८ ॥ प्रधानाश्च पण
ण्येनं सुहृद्भिरभिनंदितं ॥ अलंकृते पुरे सर्वैरानयामासुरादरात् ॥ ५९ ॥ मातरं पितरं सोपि ननाम
म हर्षसंयुतः ॥ ताभ्यामाशीर्भिरखिलं तं मुदितश्चासनो बभौ ॥ ६० ॥ ततः कियति काले तं पुत्रं स्थाप्य
यशस्विनं ॥ स्वराज्ये कृतवीर्यश्च सस्त्रीकः प्रययौ वनं ॥ ६१ ॥ तत्र गणपतिं राजा भजन्नन्यचेतसः ॥ ९४ ॥
॥ स्वल्पकालेन सोपि तं सस्त्रीको गणपं ययौ ॥ ६२ ॥ तस्य राज्ये जनाः सर्वे संकष्टिव्रतकारकाः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ऋमेणगणनाथंतेयपुर्हस्मिप्रजापते॥६३॥इदंचकृतवीर्यस्यचरित्रंयःशृणोतिचेत्॥पठतिनस्य
संकष्टंचतुर्विधंभवेन्नच॥६४॥इतिश्रीमद्गांशेमौद्गले०नृ०म०॥कृतवीर्यचरित्रंनामचतुः
त्रिंशोध्यायः॥३४॥मुद्गलउ०॥ततःसकार्तवीर्योयंचकारराज्यमुत्तमं॥धर्मेणराजनीत्यास्वां
पालयामासहिप्रजां॥१॥ततस्तेनचभूपेनजिताःसर्वेमहीभृतः॥सप्तद्वीपवतींपृथ्वींबुभुजेब
लसंयुतः॥२॥हैवैःसंस्थापितंनामसहस्रार्जुनमाहरात्॥नसमंतेनकिंचिद्वैबभूवक्षत्रिमंडले
॥३॥स्वर्गेहिवाद्यपक्षैवआसन्यक्षाबभूविरे॥यदाक्रुद्धःस्वयंराजानहास्यर्गंगमिष्यति॥४॥नसं
ख्यावर्ततेतस्यसैन्यानानांचप्रजापते॥यशसातेजसापूर्णंपूरितंतेनवैजगत्॥५॥एकदान
र्मदामध्येविक्रीडस्त्रिकोनृपः॥सहस्रैर्बाहुभिस्तत्रजलौघंध्रसलीलया॥६॥तत्रयेतनर्मदा
तीरेरावणःससहानुगः॥पुपूजशांकरंलिंगंजलोपस्थितआगतः॥७॥पूजाविधिंसशीघ्रेण

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो०
९५ समाप्य राक्षसाधिपः॥ पप्रच्छ केन दूतोऽयं जलौघः संप्रवर्तितः॥८॥ गत्वा दूतस्तथामात्यः क्षिप्रमुक्तं नृ०
स्त्वाकरोत्॥ तं दृनिष्पामि संक्रुद्धो विस्मयं गेन दुःखितः॥९॥ ततस्ते त्वरयाजग्मुर्दृष्ट्वा तं कार्तवी
र्यकं॥ समाचख्युर्महाहैहयं रावणं विस्मिता विभो॥१०॥ श्रुत्वा वृत्तान्तमेवं स रावणस्तं ययौ नृप
॥ प्रधानैः षड्भिरसंतं क्रोधयुक्तः प्रतापवान्॥११॥ सहस्रा रावणं दृष्ट्वा गदां गृह्य महाबलः॥
आदृर्वसत्रेण संयुक्तो युयुधेऽर्जुन एकलः॥१२॥ गदायुद्धं महाघोरं तत्र तयोर्बभूव च॥ ततः स
गदया राजापि पिष्टे रावणं परं॥१३॥ कक्ष्वा त्विके मेतस्य राक्षसस्य नराधिपः॥ भ्रहयामास
वेदृस्सपपात रावणो हतः॥१४॥ तं गृह्य स्वगृहे भूपो यमोतत्र बबंध सः॥ निकटे स्थापया ॥ ९५॥
मास सभायां खेलकारणात्॥१५॥ हसाम स्ताव मुक्तो तं दृष्ट्वा विक्रीडभूमिपः॥ ततस्तं मुनिव
पश्चि पुलस्त्यः सहसाययौ॥१६॥ तं प्रणम्य महाभागं गाण्यपसं विरोषतः॥ पुपू[illegible]जभक्ति

संपुक्तो भोजयामास यत्नतः ॥१७॥ पुनः प्रणम्य तं विप्रं कृतांजलिपुटः पुरः ॥ संस्थितस्तमुवा
चाथ मुनिः सर्वार्थकोविदः ॥१८॥ रावणं मुंच राजेंद्र मत्पौत्रं वरसंयुतं ॥ मित्रभावेन तिष्ठस्व राव
णस्य महामते ॥१९॥ तथेति तं जगादासौ मुमोच रावणं नृपः ॥ पुलस्त्यः प्रययौ स्थानं तमभि
वंद्य चाशिषा ॥२०॥ इत्यादितेजसा युक्तः साक्षाद्विष्णुमयो नृपः ॥ वर्णितुं न भवेच्छक्तो धर्मशीलो
बभूव ह ॥२१॥ दिग्जये येन राज्ञा वै समुद्रः पादघाततः ॥ ताडितः स विशीर्णोर्मिर्भूद्भयभीतः प्रजाप
ते ॥२२॥ यज्ञान् स विपुलांश्चक्रे भूरिदक्षिणसंयुतान् ॥ स्वाहास्वधावषट्कारैर्मुमुदुर्देवताद
यः ॥२३॥ येन पह्मार्थितं तत्र द्विजेन न तद्ददौ नृपः ॥ स्वस्वधर्मरतान् लोकान् कारयामास यत्नतः
॥२४॥ स हि गणेशभक्तिं स्वचकार नृपसत्तमः ॥ गाणपत्यप्रदीपश्चासीत्तीर्थदेवातिथिप्रियः ॥
२५॥ आगतः समपूरेखां यात्रां न च चकार ह ॥ वर्षमाषितोरा आपातार्थं को लुपः स्वयं ॥२६॥ ग त्रो॰ ९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लेशं स्थापयामास ब्राह्मणो मंत्रकोविदः ॥ प्रवालगणनाथं वै नाम रत्नापुरस्कृतं ॥ २७ ॥ एवं नाना
विधैर्भावैर्गणेशमभजत्सदा ॥ त्रिलोकं कीर्तिसंगीतो बभूव कृतवीर्यजः ॥ २८ ॥ चतुर्थीव्रतजेनैव
वतेजसा संयुतो बभौ ॥ अंगहीनप्रभावेण मोहयुक्तो बभूव ह ॥ २९ ॥ देवादीनामभून्मान्यः श्रिया
परमया युतः ॥ भोगयुक्तस्वभावेन विसस्मार गजाननं ॥ ३० ॥ सकाममंत्रं गणेशस्य ब्रह्मज्ञानमदे
नसः ॥ अहंकारेण रूपः सन् कुंभजाम्यवदद्बलः ॥ ३१ ॥ ततोतिविघ्नसंयुक्तो बभूव सोर्जुनः प्र
भो ॥ तच्छृणुष्व महाभाग कथयामि प्रचेष्टितं ॥ ३२ ॥ सैन्येन संयुतो राजा मृगयार्थं वनं ययौ ॥
नीलवेषधरो भूत्वा सैनिकास्तादृशा बभुः ॥ ३३ ॥ जघान विविधांस्तत्र मृगांस्तान्नगरे स्वके ॥ प्रे
षयामास दूतैः स बभ्राम यत्र तत्र वै ॥ ३४ ॥ ततो कस्मान्महाराजो ददर्शाश्रममुत्तमं ॥ मुनेः प
प्रच्छ राजासौ सचिवानाश्रमः कुतः ॥ ३५ ॥ तचुचुर्जमदग्नेर्वै मुनेराश्रम आगतः ॥ ततः सोपि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मुनिंद्रक्षययोर्हर्षसमन्वितः॥३६॥प्रणम्य सचिवैर्मुख्यैः संवृतः सकृतांजलिः॥उवाच मुनि
शार्दूलं जमदग्निं महायशाः॥३७॥धन्यं मेघ महायोगिन् जन्मज्ञानादिकं तथा॥कुलं च पितरो
सर्वे सेहं प्रियुगदर्शनात्॥३८॥ततस्तं मुनिमुख्योसावासनादिकमादरात्॥दत्वा शिष्यैश्च सं
पूज्य पप्रच्छ कुशलादिकं॥३९॥प्रयोजनं तथा विप्रः पप्रच्छ राजसत्तमं॥मानयामास तं भूपं विलो
रंशा समुद्भवं॥४०॥ततो राजा मुनिं दृष्ट्वा जगाद हर्षसंयुतः॥तवाशीर्वचनेनैव कुशलं मे प्रवर्तते॥
४१॥मृगयासक्तचित्तोहमागतो मुनिसत्तम॥पूर्वपुण्यबलेनैव प्राप्तं ते दर्शनं महत्॥४२॥स
वैः सह महाभाग पवित्रोहं न संशयः॥दर्शनेनैव संतुष्ट आज्ञां देहि धुना प्रभो॥४३॥गमिष्या
मि ससैन्योहं नगरे स्वमहामते॥न तेस्समं च योगेन तपसा भासते मुने॥४४॥ततस्तं मुनि
मुख्यो सो जगाद हर्षसंयुतः॥विलोरंशाः स्वयं हि मे संप्राप्त आश्रमे धुना॥४५॥अनायासेन

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

भोराजन्नृतनत्वांप्रार्थयेविभो॥भुंक्ष्वकिंचिन्मयाहृत्तमपराह्णेसमागतः॥४६॥ततोराजाज्ञ
गारेहंभवतितंप्रणम्यसः॥स्वामिन्वनेषुमेसैन्यंक्षुधितंभ्रमणेरतं॥४७॥तस्यकथमेकोहंभुन
ज्मिमुनिसत्तम॥सर्वेषांभोजनेशक्तिर्वर्ततिनैवतेमुने॥४८॥वदामितेनयोगींद्रआज्ञांदेहिविभ
प्रभो॥गमिष्यामित्वयायुक्तोनगरेसैन्यसंयुतः॥४९॥ततस्तोराजशार्दूलमुवाचमुनिसत्तमः॥न
चिंतांकुरुराजेंद्रससैन्यंभोजयाम्यहं॥५०॥तपसामेमहाराजवश्यंब्रह्मांडमंडलं॥अतस्त्वं
गच्छनद्यांवैस्नानार्थंसर्वसंयुतः॥५१॥तथेतितंप्रणम्यासौजगामसैन्यसंयुतः॥स्नानार्थंविस्मि
तोभूत्वासहस्रार्जुनआदरात्॥५२॥इतिश्रीमद्हंसेमोद्गले०नृ०म०सहस्रार्जुननिमंत्रणोनामपं ॥९८॥
चत्रिंशोध्यायः॥३५॥मुद्गलउवाच॥गतेराजनिभोदक्षजमदग्निर्महामुनिः॥रेणुकांचसमाहू
यवाक्यंतमवदत्तत्स्वयं॥१॥ततस्ताभ्यांस्मृतादेवीकामधेनुःप्रजापते॥समागतांप्रसंपूज्यप्रा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

थेयं तावुभौ समं ॥२॥ कार्तवीर्यः ससैन्यश्च भोजनाय निमंत्रितः ॥ तदर्थं कुरु कल्याणि यत्नं प्र
तरितास्व वै ॥३॥ तयोर्वचनमाकर्ण्य कामधेन्वा महत्पुरं ॥ रचितं स्वप्रभावेण परिखावप्रावि
तं ॥४॥ चतुर्विधान्नसंयुक्तं निर्ममे पाकशालिकां ॥ क्षणेन तां स समालोक्य हर्षितश्चाभव
न्मुनिः ॥५॥ शिष्यै राजानमाहूय ससैन्यं तं प्रजापते ॥ भोजयामास विप्रोसावन्नैर्नानाविधैः परैः
॥६॥ अमृतं कल्परूपं ते बुभुजुर्हर्षसंयुताः ॥ घृतमास्तेपलक्षं द्राहीनपक्षयामासुराकुलाः ॥७॥
ततस्तांबूलकान्सर्वेव भक्षुः प्रेमसंयुताः ॥ तैलाचस्त्रादिभिस्तत्र सत्कृता मुनिना प्रभुः ॥८॥
राजा सविस्मितो भूत्वा प्रणनाम महामुनिं ॥ आज्ञां गृहित्वा सैन्येन ययौ स्वनगरं प्रति ॥९॥ ग
च्छंतं तं प्रधानश्चोवाच विनयसंयुतः ॥ धेनुं प्रार्थय राजंस्त्वं ब्राह्मणस्त्वां प्रदास्यति ॥१०॥ र
त्नभूता महाराज धेनुरियं न संशयः ॥ तां विना राज्यमुग्रं ते निष्फलं भासते धुना ॥११॥ तस्य त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० हृचनंश्रुत्वाराजामोहेनसंयुतः॥ विघ्नेनपीडितोसौतमुवाचसचिवंवचः॥१२॥गच्छत्वंप्रार्थ्यवि रा०
९८ प्रेतंधेनुमानयसत्वरः॥तथेतिसैन्यमादायमुनिंदुष्टसमाययौ॥१३॥प्रधानोमुनिमुख्यंतंप्रण
म्याभिदधेवचः॥मुनेधेनुमिमांदेहिराज्ञेतिथिस्वरूपिणे॥१४॥ततस्तंकोपसंयुक्तंब्यात्यमु
निसत्तमः॥नदास्यामिमहामुख्यधेनुंदेवस्वरूपिणीं॥१५॥ततःसोपिमहावीरैर्गृह्यधेनुंबला
त्खलः॥निर्जगाममुनेस्तस्याश्रमात्कोपसमन्वितः॥१६॥ततोधेनुःसमाकृष्टासस्रजेबल
मुत्कटं॥तेनसैन्यंहतंतस्यप्रधानसहितंप्रभो॥१७॥ज्ञात्वावृत्तांतमुग्रंतत्क्षुभितःकार्तवीर्यजः
पुत्रार्थंगर्वसंयुक्तोययौतस्याश्रमंविधे॥१८॥ततस्तस्यमहत्सैन्यंहतंधेन्वाबलेनवै॥राजाखे ॥९८॥
दसमायुक्तःपपालगतमत्सरः॥कामधेनुर्गतास्वर्गंराजापुनःसमाययौ॥हृदिविध्यायबाणे
नमुनिंमृतंचकारह॥२०॥ततस्तंभर्त्स[illegible]यामासरेणुकाभूमिपाधम॥एकविंशतिवारे

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्तां विद्याय सर्वतो नृपः ॥२१॥ ततः साधुमिनास्त्रं नमुवाच तं नृपाधमं ॥ स्वल्पकालेन राजं स्त्वं मरिष्यसि न
संशयः ॥२२॥ सहस्रभुजच्छेदस्ते भविष्यति सुदुर्मते ॥ ततः सोपि भयाद्धिग्नो जगाम नगरे स्वके ॥२३॥ गते
भूपे मुनेः पत्नी रुरोद हा रुणस्वरा ॥ सस्मार तनयं रामं बद्रिकाश्रमगं प्रभुं ॥२४॥ स्मृतिमात्रेण रामः स
मयो मातुरंतिके ॥ दृष्ट्वा मृतं महाविप्रं पितरं प्ररुरोद ह ॥२५॥ मातरं बाणनिर्भिन्नां विदृश्य विशेष
तः ॥ प्रभुर्निष्कारायामास शरान् मातुः शरीरगान् ॥२६॥ ततस्तं रेणुका देवी सांत्वयामास युक्तितः ॥ मा
शोकं कुरु पुत्र त्वं स्थास्यामि निकटे प्रभो ॥२७॥ दग्धा त्रेयं समानिय कुरु कर्म यथाविधि ॥ आवां वै प्रभवि
ष्यावो देहे पुत्रौ पुनः प्रभो ॥२८॥ नान्योपायः कोन संदेहस्तस्माद्यत्नपरो भव ॥ जहि दुष्टं च भूपं त्वं हस्तानां
छेदनं कुरु ॥२९॥ ततस्त्वजनकं तत्र तस्य देहोद्भवे न च ॥ रक्तेन तर्पयस्व त्वं ततः सोपि भविष्यति ॥३०॥
ममांग एव विंशाश्च बाणास्तेन समर्पिताः ॥ एकविंशति वारं त्वं कुरु निःक्षत्रियां धरां ॥३१॥ एवमुक्त्वा गता

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दृष्ट्वा भयसंयुक्तो रामः सस्मार मातरं ॥ स्मृतिमात्रेण सा याता शिरोमात्रप्रजापते ॥ पं ३

मो॰ देवी स्वर्गे दिहं विसृज्य सा ॥ रामस्तथा च काररासौ स्वेन सहितस्ततः ॥ ३२ ॥ पंचमे दिवसे रामः कर्म कृत्वा स ते
९९। मास्थितः ॥ दत्तात्रेयो ययौ स्थाने हृष्ट्वा भिक्षार्थमादरात् ॥ ३३ ॥ षष्ठे दिने समायातो व्याघ्रस्तत्र महाबलः
॥ तं दृष्ट्वा विस्मितो रामस्तं प्रोवाच हि रेणुका ॥ ३४ ॥ किमर्थं मातुलापुत्र तव रूपं हास्य मागता ॥ ततो वत्स मुनिम
करो ह्याघ्रः परमदुर्जयः ॥ ३५ ॥ एतस्मिन्नंतरे तत्र दत्तात्रेयः समाययौ ॥ दृष्ट्वा तां राममामंत्र्यो वाच योग
विदां वरः ॥ ३६ ॥ किमर्थं रेणुका तात त्वया समागता ॥ न्यूनं दृष्टा विशेषेण कुरु कर्म यथाविधं ॥ ३७ ॥
वृत्तांतं कथयामास सम लं मुनिसत्तमं ॥ चकार कर्म सांगं तद्दत्तेन सहितः प्रभुः ॥ ३९ ॥ सपींडिकरणं
रामश्चकार द्वादशेहनि ॥ पाथियं द्रुममेवं सत्रयोदशादिनेनथा ॥ ४० ॥ ततः स जमदग्निस्तं दिव्यदेहः ॥९९॥
समागतः ॥ राममालिंग्य संहृष्टो बभूव मुनिसत्तमः ॥ ४१ ॥ जमदग्निं ततो दृष्ट्वा रेणुका हर्षसंयुता ॥
उवाच भगवं भीरो वो यथ पन्थो यथ राघवः ॥ ४२ ॥ गणेशं मंत्रराजेन भजंतं भावपूर्वकं ॥ तेन विघ्नविधि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नोचशांतिरूपौ भविष्यथः ॥५४॥ मरणं क्षत्रिहस्तेन युवाभ्यां प्राप्तमेव च ॥ विघ्नराजमविज्ञाय ज्ञातो दुःखेन सं
युतौ ॥ एवमुक्त्वा गणेशस्य हृदि मंत्रं महामुनिः ॥ ताभ्यामेकाक्षरं विप्रो न पायुक्तौ बभूवतुः ॥५५॥ हन्तः स स्वा
श्रमेतद्वयोर्हर्षसमन्वितः ॥ पित्रोः सेवार्थमानंदाद्रामस्तत्र स्थिरोभवत् ॥५६॥ इति श्रीमदांत्येमौद्गले
०म न्वेणुकालमहाग्निसंजीवकरणं नाम षट्त्रिंशोध्यायः ॥३६॥ मुद्गल उवाच ॥ गते वर्षसहस्रे स त
पतो रापयौ प्रभुः ॥ भार्गवयोश्च विघ्नेशो वरदस्तावुवाच ह ॥१॥ गणेश उवाच ॥ रेणुके जमदग्ने हं वृणु
धा०८ तं वरमुत्तमं ॥ एकाक्षरविधानेन तपसा तोषितो भवे ॥२॥ तस्य तद्वचनं श्रुत्वा हर्षयुक्तौ बभूवतुः ॥ ऊचतु
र्गणराजं तौ भक्तिभावसमन्वितौ ॥३॥ तावूचतुः धन्यौ वं ज्ञो गणेशानं दर्शनेन तथा वयः ॥ तपः स्वा
ध्याय एवं त आवयोर्नात्र संशयः ॥४॥ एवमुक्त्वा प्रणम्यैनं पुपूजतुर्गणेश्वरं ॥ तुष्टुवतुः प्रहर्षेण स
रोमांचौ प्रजापते ॥५॥ तावूचतुः ॥ नमस्ते विघ्नपालाय भक्तानां विघ्नहारिणे ॥ विघ्नकर्त्रे ह्यभक्तानां ब्र

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ॰ ह्यभूतायतेनमः॥६॥अनादयेतनाधारवक्रतुंडस्वरूपिणे॥गणेशानअनंतानांगणानांपतयेनमः॥७॥ना न॰
१०० नाशक्तियुतायैवनानाभेदकरायते॥नानाभेदविहीनायहेरंबायनमोनमः॥८॥अमेममायायाचैवखेल
कायचढुंढये॥सिद्धिबुद्धिसहायायसिद्धिबुद्धिवरायच॥९॥स्वानंदपतयेतुभ्यंभक्तेभ्योयोगदायिने॥यो
गाकारायपोगायशांतिदायनमोनमः॥१०॥अखंडानंदरूपायभुक्तिमुक्तिप्रदायच॥लंबोदरायदेवायचै
कदंतायतेनमः॥११॥महोदरायविघ्नानांपतयेसुखदायिने॥मूषकध्वजिनेतुभ्यंमूषकवाहनायच॥१२
चतुर्भुजायसर्वेषांमादिपूज्यायभोगिने॥ज्येष्ठराजायसर्वेषांमातृपितृस्वरूपिणे॥१३॥यंस्तोतुंनसमर्था
श्चवेदादेवाःशिवादयः॥योगिनस्तंकथंस्तौमिहेतस्त्वांप्रणमावहे॥१४॥एवंस्तुत्वागणेशानंप्रणतौम
तिसंयुतौ॥तावुत्थाप्यगणाधीशउवाचहर्षसंयुतः॥१५॥वरंवृणुतंपुत्रौदास्यामिमनसीप्सितं॥ ॥१००५॥
यमिच्छथोमहाभागौभक्तिभावनियंत्रितः॥१६॥गणेशवचनंश्रुत्वादंपतीनमथोचतुः॥प्रणम्यचपु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नःपादौसंस्पृश्यहर्षसंयुतौ॥१७॥रेणुकाजमदग्निश्चचलुः॥यदिप्रसन्नभावेनवरदोसिगजानन॥तदोत
पादपद्मेनौभक्तिंदेहिसुखप्रदां॥१८॥योगशांतिंचविघ्नेशदेहियोगेश्वरोपरां॥गाणपत्यप्रियत्वंवैसदास्वा
नंददायकं॥१९॥ॐमित्युक्त्वागणाध्यक्षःपुनःप्रोवाचतौनदा॥दृष्ट्वाभक्तिंतयोर्भाविंभ[illegible]क्तेभ्यःसुखदा
यकः॥२०॥भवत्कृतमिदंमेयत्स्तोत्रंयोगप्रदंभवेत्॥यंयमिच्छतितंतंवैदास्यामिस्तोत्रपाठनः॥२१॥
जमदग्नेसदाशांतोभववेमभक्तिकारकः॥रेणुकेदेहसुखात्वंभजमांयोगभाविता॥२२॥लोकास्त्वांमस्व
काकारांपश्यंतिनात्रसंशयः॥ज्ञानदृष्ट्यातथासांगांपश्यंतिदेवतादयः॥२३॥एवमुक्त्वांतर्दधेसोग
स्म॰ णेशोविघ्ननायकः॥रेणुकाजमदग्निश्चस्वाश्रमस्थौबभूवतुः॥२४॥ततःकदाचिद्रामस्तौप्रणिपत्यकृ
तांजलिः॥उवाचपितरौवाक्यंसाक्षाद्विष्णुःप्रतापवान्॥२५॥रामउवाच॥अर्जुनंप्रहनिष्यामितथा
निःक्षत्रियांधरां॥करिष्यामिनसंदेहःपितरौभवदाज्ञया॥२६॥ततस्तं [redacted]॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जमदग्निश्चोवाच हर्षसमन्वितः ॥ मा कुरुष्व तथा हिंसां राम गर्वं परित्यज ॥२७॥ ततस्तं भार्गवं राम उवाच वि
नयान्वितः ॥ मातुरग्रे प्रतिज्ञा च कृता मया मुनीश्वर ॥२८॥ तां सत्यां च करिष्यामि मा नृपन्ति परायणः ॥ रे
हस्यागं करिष्यामि नदर्थमथवा मुने ॥२९॥ तस्याग्रहं समालोक्य जगाद पुत्रमादरात् ॥ शंकरं गच्छ भो राम
स ते भीष्टं करिष्यति ॥३०॥ तौ प्रणम्य जगमासौ कैलासे शंकरं प्रभुं ॥ प्रणिपत्य महेशानं स्तुत्वा तमब्रवीद्वचः
॥३१॥ कार्तवीर्यं हनिष्यामि क्षत्रहीनां तथा धरां ॥ एकविंशतिवारं च तत्रोपायं वद प्रभो ॥३२॥ ततएका
क्षरं मंत्रं गणेशस्य ददौ शिवः ॥ रामायतं प्रणम्यासौ ययौ वनं महाबलः ॥३३॥ पूर्वजन्मनि देवस्य गणे
शस्य कृतं तपः ॥ वामनेनेन सततस्मृत्वा तत्र च तपसि संस्थितः ॥३४॥ वायुभक्षस्ततो मंत्रं जजाप ध्यानसं
युतः ॥ समाधिना महोग्रेण तोषयामास विघ्नपं ॥३५॥ गते वर्षशते पूर्णे तमाय योगजाननः ॥ भक्तं
भक्त्यासमायुक्तं महोग्रतपसायुतं ॥३६॥ उवाच तं महाभागं भार्गवं विष्णुमव्ययं ॥ वरं वृणु महाभाग हा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्यामि भक्तिभावितः ॥३७॥ श्रुत्वा तस्य वचो रम्यमुत्थाय गणपं द्विजः ॥ ननाम दंडवद्भूमौ पुपूजतं वि
शेषतः ॥३८॥ पूजयित्वा पुनर्नत्वा तुष्टाव प्रह्वतां गतः ॥ रामो भक्तिरसेनैव संप्लुतः साश्रुलोचनः ॥३९॥
राम उवाच ॥ नमस्ते गणनाथाय भक्तानंदविवर्द्धन ॥ भक्तिप्रियाय देवाय हेरंबाय नमो नमः ॥४०॥ वे
दांतवेद्यरूपाय मनोवाणीमयाय च ॥ मनोवाणीविहीनाय योगाकाराय ते नमः ॥४१॥ गजवक्त्राय
वै तुभ्यं निर्गुणाय परात्मने ॥ सगुणाय नराकारकंठाय स्थायते नमः ॥४२॥ अनादये च सर्वेषां पूज्या
य सर्वदायिने ॥ आदिपूज्याय विघ्नेश नानाविघ्नप्रचालक ॥४३॥ विघ्नहंत्रे सुभक्तानां विघ्नकर्त्रे दुरा
त्मनां ॥ सदा स्वानंदनाथाय ढुंढिराजाय ते नमः ॥४४॥ वक्रतुंडाय ते नाथ लंबोदराय वै नमः ॥ सततं
शांतिरूपाय शांतिदाय नमो नमः ॥४५॥ महोदराय सिद्धेश्च बुद्धेश्च पतये नमः ॥ नानैश्वर्यप्रदात्रे
तेश्रमदाय नमो नमः ॥४६॥ नानाज्ञानप्रभेदैश्च मोहकर्त्रे नमो नमः ॥ सुभक्तानां सदा नाथ भ्रममो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० हारिहारिणे॥४७॥नानादैत्यनिहंत्रे च देवानां मदहारिणे॥सुरासुरमयायैव ब्रह्मेशायनमोनमः॥४८ गं०
१०२ सर्वत्रयोगरूपेण संयोगायोगहीनतः॥संस्थितं तं कथं स्तौमि त्वां विघ्नेशावरप्रभो॥४९॥यं समर्थाश्वि
ना धृष्टयोगिनः शेषकाश्यपः॥शिवादयश्च वेदाश्च स्तोतुं न प्रभवंति ते॥५०॥तं किं स्तौमि गणाधीश
मतस्त्वां प्रणतो भवं॥तेन तुष्टश्च मां नाथ पालयस्व हताश्रितं॥५१॥एवं संस्तुवतस्तस्य भक्तिभावेन
मानद॥भक्त्या रोमोद्गमः प्राप्तः कंठरोधो बभूव ह॥५२॥ननर्त परमानंदयुक्तो सौ भार्गवाग्रणीः॥
जय विघ्नेश हेरंब गणेशेति वदंस्तदा॥५३॥तं तथा भक्तिसंमग्नं वीक्ष्य देवो गजाननः॥उवाच साश्रु
नेत्रश्च सरोमांचः प्रजापते॥५४॥राम राम महाभाग शृणु मे परमं वचः॥धन्योसि सर्वभावेन भक्तो
मे मग्नतां गतः॥५५॥त्वया कृतमिदं स्तोत्रं भक्तिरसप्रदं भवेत्॥पठिष्यंति च यश्चैतच्छृणुयात्सग -॥१०२॥
नं प्रियं॥५६॥तस्याहं सकलां बाधां नाशयिष्यामि निसदा॥इह भुक्त्वाखिलान्भोगानंते स्वानंदगो

भवेत्॥५७॥ पंयं विंनयतिप्राज्ञस्तं तं हास्यामि वेञ्राव॥ मम मान्यः सहासो पि भविता नात्र संशयः॥५८॥ प
रशुं मे ग्रहाण त्वं तेन मतुल्यगो भवेः॥ जयिष्यसि महावीरमर्जुनं राजमिर्वृतं॥५९॥ निःक्षत्रियां तथा पृथ्वीं
करिष्यसि न संशयः॥ एकविंशतिवारं त्वं सहाजयसमन्वितः॥६०॥ नाम्ना ते सर्वविख्यातं भविष्यति शुभ
प्रदं॥ परशुराम इत्युक्तं स्मरणेन सुखप्रदं॥६१॥ यत्रान रक्षा महाभाग यज्ञाः स्थाप्य महीतले॥ ज्ञांनियो
गस्य भावेन मां भजिष्यसि निस्पृहः॥६२॥ एवमुक्त्वांतर्दधे सो जन्मिद्गम्यं गणेश्वरः॥ रामः संस्थापया
मास गणेशं ब्राह्मणैस्ततः॥६३॥ तं पूज्य स्वगृहं रामो ययौ हर्षसमन्वितः॥ रेणुकां जमदग्निं स नना
म परशुधरः॥६४॥ तयो राज्ञां गृहीत्वा स आशीर्भिश्च समन्वितः॥ जुहाव कार्तवीर्यं तं महाबलपरा
क्रमं॥६५॥ सिंहश्च कक्वैर्युक्ता राजानः सर्व आगताः॥ अयुध्याः सर्वभावेन देवादीनां महाबलः॥
६६॥ गणेशावरदानेन परशोस्तेन सा प्रभुः॥ रामः सर्वांश्च संग्रामे मारयामास यत्नतः॥६७॥ ततः

मो० १०३ सकार्तवीर्यंतंजघानरोषतोहठं॥युद्धंसहामहाघोरंबाहूंश्छिच्छेदलीलया॥६८॥ममारकार्तवीर्यश्चप २०
रशुनाप्रजापते॥ततःसविजयीरामःक्षत्रीणांप्रवधेरतः॥६९॥निःक्षत्रियांधरांतत्रचकारक्रोधसंयु
तः॥पुनर्ब्राह्मणवीर्येणक्षत्रियाःप्रबभूविरे॥७०॥रामेणैनपुनःसर्वेहताःक्षत्रिकुलोद्भवाः॥क्षत्रि
हीनाधरा हत्क्षत्रियपत्न्व पुनःपुनः॥७१॥एकविंशतिवारंसहत्वानिःक्षत्रियांधरां॥क्षत्रियाणांचर
क्तेनतर्पयामासपूर्वजान्॥७२॥यज्ञंकृत्वाददौपृथ्वींब्राह्मणेभ्योमहायशाः॥समुद्रेणततस्तस्मैद
त्तापृथ्वीमयाद्विधा॥७३॥तत्रायंसंस्थितोरामोभजतेगणनायकं॥अनन्यभावसंयुक्तोगाणपत्योधुना
महान्॥७४॥इदंतेकार्तवीर्यस्यरामस्यचमहाद्भुतं॥जमदग्नेरेणुकायाश्चरितंकथितंमया॥७५॥ ॥१०३॥
यःशृणोतिनरोभक्त्यापठतितस्यसंभवेत्॥भुक्तिमुक्तिप्रदंद सर्वतीर्थप्रदंपरः॥७६॥ ॥
इतिश्रीमत्संसेमौद्गले०न०म०परशुराम चरित्रंनामसप्तत्रिंशोध्यायः॥३७॥मुद्गलउवाच॥का

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्त्तवीर्यस्यपुत्रासन्शतंतत्रमहारथाः॥पंचैवबलिनःशूराधर्मात्मानोयशस्विनः॥१॥जयध्वजःशूरसे
नोवृषभोथपुरूर्जितौ॥तत्रजयध्वजोराजामुख्योभूत्सप्रजापतेः॥२॥जयध्वजस्यपुत्रोभूत्तालजंघः
प्रतापवान्॥तस्यपुत्रशतंजज्ञेतालजंघाइतिस्मृताः॥३॥तेषांज्येष्ठोमहाबाहुर्वीतिहोत्रोभवन्नृपः॥
प्र ४ वृषप्रभृतयश्चान्येयादवाःपुण्यकर्मिणः॥४॥वृषोवंशकरश्चासीत्तस्यपुत्रोभवन्मधुः॥मधोःपुत्र
शतंजज्ञेवृष्णिर्ज्येष्ठःसवंशकृत्॥५॥वीतिहोत्रसुतश्चैवानंतोनाममहायशाः॥दुर्जयस्तस्यपुत्रो
भूत्सर्वशास्त्रविशारदः॥६॥तस्यभार्यागुणैर्युक्तापातिव्रत्येपरायणा॥सतुवनेययौराजातत्रोर्व
शींददर्शह॥७॥तयासक्तःस्वयंकामीनसस्मारस्वकांस्त्रियं॥गतेबहुतिथेकालेकश्चेनबोधितोय
यो॥८॥स्वगृहंपुनरेवासौप्रायश्चित्तंचकारवै॥याजयामासतंकण्वःसविनीतोबभूवह॥९॥तस्यपु
त्रोबभूवापिसुप्रतीकइतिश्रुतः॥एतत्तेकथितंसर्वंसहस्रजित्कुलेभवं॥१०॥यमांपुत्रस्यवंशंचैवशृणु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० क्रोष्टोः प्रजापते॥ क्रोष्टोरेकोभवत्पुत्रो वृजिनवानितिश्रुतः॥११॥ तस्य पुत्रोभवत्स्वाहिः कुशेकस्तत्सुतो २०
१०५ मतः॥ कुशेकस्याभवत्पुत्रो नाम्ना चित्ररथो बली।१२। चित्ररथस्य पुत्रोभूच्छशबिंदुस्ततोभवत्॥ दशल
क्षसहस्राणि तेषु ज्येष्ठः पृथुश्रवाः॥१३॥ उशनास्तस्य पुत्रोभूद्धर्मः स एव कथ्यते॥ तस्माद्रुचकनामाभूत्त
तः पंचसुता मताः॥१४॥ तेषु वंशधरः प्रोक्तो ज्यामघो लोकविश्रुतः॥ तस्माद्विदर्भपुत्रोभूद्विदर्भाच्च कुशा
क्रथौ॥१५॥ लोमपादस्तृतीयस्तु बभ्रुस्तस्यात्मजोभवत्॥ धृतिस्तस्यात्मजः प्रोक्त उशिकस्तत्सुतोभ
वत्॥१६॥ उशिकात्तनुकोजातश्चेदिश्चैद्यस्ततोभवत्॥ तस्य पुत्रो महाबाहुः प्रभावान्कौशिकः स्मृ
तः॥१७॥ अभूत्तस्य सुतो धीमान्सुमंतश्च ततोमलः॥ अमलश्च सुतः प्रोक्तो निःश्वेतश्च महाब
लः॥१८॥ तस्य पुत्राभवन्दक्षयातं चैव महाबलः॥ क्रथस्याथ भवत्कुंतिर्धृष्टिस्तस्याथ निर्वृतिः॥१९॥ ॥१०४५॥
दशार्हस्तस्य व्योमोनस्तस्माज्जीमूतकस्ततः॥ विकृतिस्तस्य पुत्रोभूद्भीमरथो महाबलः॥२०॥ त

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्मान्नवरथोनामाबभूवचमहाबलः ॥ तस्यपुत्रोदशरथः शकुनिस्तस्यचात्मजः ॥ २१ ॥ तस्मात्करंभिः
संभूतोदेवरातोभवत्ततः ॥ ईजेसचाश्वमेधेनदेवक्षत्रश्चतत्सुतः ॥ २२ ॥ मधुस्तस्यसुतोजज्ञेतस्मात्कुरु
रजायत ॥ पुत्रद्वयमभूत्तस्यसुत्रामाचानुरेवच ॥ २३ ॥ अनोस्तुपुरुहोत्रोभूदंशुस्तस्यसुतोमतः ॥ अं
शुपः सात्वतोनाम तस्यपंचसुतामताः ॥ २४ ॥ भजमानोभजिर्दिव्योवृष्णिर्देवावृधोंधकः ॥ महाभो
जश्चविख्यातायादवेषुप्रजापते ॥ २५ ॥ भजमानस्यनिम्लोचिः किंकिणोवृष्णिरेवच ॥ अथदेवा
वृधोराजापुत्रार्थेतपआचरत् ॥ २६ ॥ बभ्रुः पुत्रोभवत्तस्यपुण्यश्लोकैर्महायशाः ॥ सर्वशास्त्रा
र्थतत्त्वज्ञः श्लोकौयस्यबभूवतुः ॥ २७ ॥ यशसातेजसासाधनात्रिलोकेषुविराजितः ॥ महाभोजकुलेजा
ताभोजास्तेवैप्रकीर्तिताः ॥ २८ ॥ वृष्णेः सुमित्रपुत्रश्चयुधाजिद्परस्तथा ॥ अनमित्रः शिनिस्तस्मा
न्निम्लोचस्तुअनमित्रतः ॥ २९ ॥ सत्राजिच्चप्रसेनश्चविख्यातौयादवेषुतौ ॥ सत्राजित्सूर्यमाराध्यम

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मी॰ ग्निं लेभे स्यमंतकं ॥३०॥ अथशिनेः समुत्पन्नः पुत्रः सर्वार्थकोविदः ॥ सत्यवाक्सत्यसंपन्नः सत्यनामा महा नृ॰
१०५ यशाः ॥३१॥ सात्यकिर्युयुधानः सततस्य जयोभवत्सुतः ॥ कुणीश्चातः सुतो धीमांस्तस्य पुत्रो युगंधरः ॥३२
अनमित्रसुतो योन्यो वृष्णिः शास्त्रविशारदः ॥ श्वफल्कश्च सुतो वृष्णेश्चित्ररथो परोभवत् ॥३३॥ श्व
फल्कः काशिराजस्य सुतां भार्यामविंदत ॥ तस्यामजनयत्पुत्रमक्रूरं साधुसंमतं ॥३४॥ आसंगसार
मेयाद्या अन्ये च द्वादशात्मजाः ॥ अक्रूरस्याभवत्पुत्रो देववानुपदेवकः ॥३५॥ चित्ररथादभूत्पुत्रः
पृथुरपृथुरेव हि ॥ अश्वग्रीवः सुबाहुश्च सुधावाद्याः सुताः स्मृताः ॥३६॥ अथांधको महाबाहुर्लेभे वै चतु
रः सुतान् ॥ कुकुरं भज्यमानं च शुचिं कंबलबर्हिषं ॥३७॥ कुकुरस्य सुतो वन्हिर्वन्हेस्तु तनयो भवत् ॥ क ॥१०५॥
पोतरोमा भोदक्ष तस्य पुत्रो भवद्दनुः ॥३८॥ सोभवत्तुंबरुमित्रस्तस्य सुतोंधकः स्मृतः ॥ अंधकारभ
वत्पुत्र ते जोपुत्रश्च दुंदुभिः ॥३९॥ स गोवर्द्धनमासाद्य तताप विपुलं तपः ॥ तस्मात्तस्मै रदौ रक्षवरं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चमनसीप्सितं ॥४०॥ चंशास्तेचाक्षयोभावीकीर्तिज्ञानादिकंयशाः ॥ सुरैःसहाधिकमित्रंकामरूपित्वमे
वच ॥४१॥ हरिद्योतःसुतस्तस्यतेजोयुक्तश्चदुंदुभेः ॥ पुनर्वसुःसुतस्तस्यतस्याहुकःसुतःस्मृतः ॥४२॥
आहुकाद्देवकःपुत्र उग्रसेनःप्रजापते ॥ देवकस्यसुतावीराजज्ञिरेदेवसंन्निभाः ॥४३॥ देववानुपदेव
श्चसुदेवोदेववर्धनः ॥ तेषांस्वसारःसप्तासन्वसुदेवायताददौ ॥४४॥ धृतदेवोपदेवाचतथैवदेव
रक्षिता ॥ श्रीदेवाशांतिदेवाचसहदेवाचसुव्रता ॥४५॥ देवकीवसुदेवायपददौसर्वाःप्रजापते ॥ उ
ग्रसेनस्यपुत्रासन्कंसमुख्यामहाबलाः ॥४६॥ भजमानाद्भूसुतोविदूरथोमहायशाः ॥ तस्यशूरस्ततः
सिनिःस्वयंभोजश्चतत्सुतः ॥४७॥ हृदिकोतोदेवबाहुस्ततःशतधनुस्ततः ॥ कृतवर्मातितोदेव
मीढोतःशूरकस्ततः ॥४८॥ वसुदेवादयोदशसहशाधर्मपरायणाः ॥ वसुदेवान्महातेजावासुदेवोज
गद्गुरुः ॥४९॥ देवकीपुत्रतांयातोदेवैःसंप्रार्थितोहरिः ॥ भूमिभारावतारायसाधूनांपालनायच ॥५०॥

मौ० रोहिणीचमहाभागावसुदेवादजीजनत् ॥ संकर्षणंततोज्येष्ठंशेषरूपंहलायुधं ॥५१॥ उमादेहधराजाता ह०
१०९ योगनिद्राचकौशिकी ॥ नियोगाद्वासुदेवस्ययशोदातनयाभवत् ॥५२॥ षड्वान्येवसुदेवस्यवासुदेवा
ग्रजाःसुताः ॥ प्रागेवकंसस्तान्सर्वान्जघानसूतिमात्रतः ॥५३॥ सुषेणश्चततोदायीभद्रसेनोमहाब
लः ॥ वज्रदंभोभद्रसेनःकीर्तिमानितिसंज्ञिताः ॥५४॥ हतेषेतेषुसर्वेषुरोहिणीवसुदेवतः ॥ असूत
लोकनाथंतंबलभद्रंहलायुधं ॥५५॥ जातेरामेचदेवानामादिमात्मानमच्युतं ॥ असूतदेवकीचूसं
श्रीवत्सांकितवक्षसं ॥५६॥ इतिश्रीमहांयेमौझले० तृ० अ० हरिवंशवर्णनंनामाष्टत्रिंशोध्यायः ॥
३८ ॥ मुद्गलउवाच ॥ रामस्यरेवतीभार्यास्वरूपासीद्गुणान्विता ॥ तस्यामुत्पादयामासपुत्रौद्वौनि
षधोल्मुकौ ॥१॥ षोडशस्त्रीसहस्राणिशतमष्टोत्तरंतथा ॥ कृष्णस्यपत्न्यःप्रोक्ताश्चारुरूपाःसु ॥१०६॥
लोचनाः ॥२॥ तासुपुत्राबभूवुश्चशतशोथसहस्रशः ॥ प्रत्येकंदशपुत्राश्चदुहितैकाबभूविरे ॥३॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रद्युम्नसांबमुख्याश्च महातेजोयुताः सुताः॥ महारथा महाभागा बभूवुर्ज्ञानसंयुताः॥४॥ प्रद्युम्नस्य च पुत्रो
भूदनिरुद्धः प्रतापवान्॥ तस्य पुत्रस्तु वज्रोभूत्स एव वंशधारकः॥५॥ मुसलास्त्रो वशेषो भूद्देवं नानाविधान्
पाः॥ ज्ञातास्तत्र न शक्यं वै भवति कथितुं मया॥६॥ दक्ष उवाच॥ कथं विष्णुः स्वयं साक्षान्मानुषे देहधारकः
॥ बभूव तत्र यन्मूलं तदेव वद मानद॥७॥ मुद्गल उवाच॥ शृणु कथां महारम्यां पुराजातां प्रजापते॥ यया
ते संशयः सर्वो नाशमेष्यति निश्चितम्॥८॥ पुरा देवेश्वरे शेषशायिना विष्णुसमन्विते॥ राज्यं सत्यक्त्वा नतो दै
त्या वनेषु व्यचरन्भयात्॥९॥ ततस्तान्हंतुमत्यंतं देवासुरा युधा ययुः॥ प्रल्हादप्रमुखाः सर्वे भयभीता
स्तेभवन्॥१०॥ अनाथास्तान् थोचुस्ते रत्नाकरपुटं पुरः॥ राज्यं सत्यक्त्वा वयं सर्वे वनेषु विचरामहे॥११॥
शस्त्रादिभिर्विहीनाश्च कथं हंतुं समुद्यताः॥ सुराः सर्वं भवद्भिश्च गृहीतं तदपि ह्यहो॥१२॥ अतो नो रक्ष
त धर्मज्ञाः शरणं समुपागतान्॥ मा हिंसत महाभागा दीनांश्चैव विशेषतः॥१३॥ तथापि विष्णुना तत्र प्रेरि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

भै०	तात्तिचदानवान्॥देवा हंतुं समारब्धाः पपलुरसुरास्तदा॥१४॥शरणं स्वगुरुं तत्र भृगुं योगनिधिं ययुः॥उ न
१०७	दायुधाः सुरास्तत्राजग्मुः क्रोधसमन्विताः॥१५॥तत्र सर्वे भृगुं दृस्स दृहश्रुर्नचदानवाः॥समीपार्थंग
तं ज्ञात्वा भृगुपत्नी समाययौ॥१६॥रक्षतो हे विभीतांस्तान्देवेभ्यः शरणंगतान्॥नोचेद्धूयं मरिष्यामस्त्व
दग्रे नात्र संशयः॥१७॥तेषां वचनमाकर्ण्य तानुवाच सुखप्रदा॥माभयं कुरुत ह्येवं वारयामि सुरान
हं॥१८॥तस्यास्तद्वचनं श्रुत्वा हर्षयुक्ताश्च दानवाः॥तत्र संस्थास्ततो दृष्टनिश्वासोच्छ्वाससंयुताः॥
॥१९॥एतस्मिन्नंतरे तत्राजग्मुर्विष्णुपुरोगमाः॥देवा उदायुधाः सर्वे दैत्यान्हंतुं प्रचक्रमुः॥२०॥तानु
वाच भृगोः पत्नी मा हिंसत सुरोत्तमाः॥दैत्यान्मे शरणं प्राप्तान्राज्यहीन्वीशोषतः॥२१॥तामनादृत्य दे ना३
वेंद्रो विष्णुनाप्रेरितः स्वयं॥वज्रं धृत्वा ययौ हंतुं दैत्यान्क्रोधविलोचनः॥२२॥ततो भृगोश्च पत्नी सा १०७
चुकोप तपसा स्वयं॥सवज्रं देवराजं तं स्तंभितं प्रचकार ह॥२३॥तान्दृष्ट्वा विष्णुना तत्र चक्रेणाधुर

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ने मिना॥ शिरश्छिन्नं भृगोः पत्न्याः पपात सा धरातले ॥२४॥ एतस्मिन्नेव काले स भृगुस्तत्र समागतः ॥ मृ
तां पत्नीं तथा दृष्ट्वा चुकोपारुणलोचनः ॥२५॥ शशाप विष्णुमावेशा पतत्वं पृथिवीतले ॥ ब्राह्मणीवधदोषे
ण देवाधम न बुध्यसे ॥२६॥ भृगुणा तपसा स्वेन ज्ञानेन च प्रजापते ॥ जीवयुक्ता कृता पतिरक्षिता हतया
स्तथा ॥२७॥ ततो विदुःखितो देवो विष्णुः शोकसमन्वितः ॥ आराध्यं विघ्नराजं वै ययौ क्षेत्रे मयूरके ॥२८॥
न तत्रातिपत्सा देवं वर्षमात्रं प्रजापते ॥ निराहारेण भक्त्या स तोषयामास विघ्नपं ॥२९॥ ततस्तेन गणराजः स
ययौ भक्तिनियंत्रितः ॥ उवाच च महाविष्णुं वरं वृणु मनेप्सितं ॥३०॥ गणेशं प्रणनामाथोत्थाय स विष्णु
स्त्रवैः ॥ पुपूज भक्तिभावेन तुष्टाव तं गजाननं ॥३१॥ अथर्वशिरसा तेन स्तुतस्तं प्रत्युवाच ह ॥ वरं
वरय दास्यामि मा खेदं कुरु केशव ॥३२॥ विष्णुरुवाच ॥ यदि प्रसन्नभावेन वरदोसि गजानन ॥ शापं मे भृ
गुसंभूतं निवर्तय महाप्रभो ॥३३॥ अत्रैवावसस्व स्थानं देहि ते भजनाय मे ॥ निर्विघ्नं सर्वदा स्वामिन्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० १०८ कुरुमांत्वंसदाप्रियं॥३४॥ओमित्युक्त्वास्वयंहृष्टःस्वात्मभक्तमुत्तमं॥माचिंतांकुरुविप्रोत्वंशृणुमेपर २०
मंवचः॥३५॥भृगोमदीयभक्तस्यवाणीनवैमृषा॥करिष्यामिकदातस्मान्मर्त्यलोकेपतिष्यसि
तस्य२ ॥३६॥तत्रैवत्वंसदाज्ञानंनष्टंनप्रभविष्यति॥मत्प्रसादाच्चदेवेशस्वेच्छाचारीसदासुखी॥३७॥देवैः
संप्रार्थितस्त्वंवैदैसाहीनांवधायच॥धर्मसंस्थापनार्थायावतारंप्रधरिष्यसि॥३८॥तत्रतेकीर्ति
स्तोत्रंभविष्यतिविशेषतः॥यशोमद्पृथिव्यांतंसंस्थापयिष्यसिकेशव॥३९॥तेषांचतुविधांवां
छांपूरयिष्यसिनिसदा॥तत्रत्वदीयभक्ताश्चभविष्यंतिविशेषतः॥४०॥पुनश्चदेवकार्यंत्वंकृत्वा
देवजनार्दन॥विकुंठेतेसदावासोभविष्यतिनसंशयः॥४१॥स्वेच्छयादेहवांस्त्वंवैभविष्यसिन
संशयः॥मत्प्रसादाद्धृषीकेशसर्वंतेवांछितंभवेत्॥४२॥अन्यंत्वयाचदेवेशप्रार्थितंतंभविष्य ॥१०८॥
ति॥वसत्वंक्षेत्रगोभूत्वास्थानंदत्तंमयाक्षयं॥४३॥इत्युक्त्वांतर्दधेदक्षगणेशःकरुणानिधिः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विसुनातत्र संवासः रत्नो भक्त्या प्रजापते ॥४४॥ एवं दिग्भागदेशेष्वेवे स्थापितो गणनायकः ॥ विसुविना
यक इतिनामतस्य ख्यतं द्विजैः ॥४५॥ एतत्ते कथितं दक्ष सर्वे हृधारणकारणं ॥ विसोर्ईवाधिपस्या विनानायो
निसमुद्भवं ॥४६॥ इति [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ इति श्री महाकाले मो॰ न॰ म॰ विसुदेहधारणकारणवर्णनं ना

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नामैकोनचत्वारिंशोऽध्यायः ॥३९॥ मुद्गल उवाच ॥ पूर्वो वंशे महाभागा राजानो धर्मशालिनः ॥ बभू
वुर्यज्ञकर्त्तारः स्वधर्मनिरताः किल ॥१॥ तेषां चरित्रमेसंतं कथितुं न प्रशक्यते ॥ बहुत्वात्कारणं रक्ष
शृणु ते कथयाम्यहं ॥२॥ पुरो वंशे महाराज शंतनुः प्रबभूव ह ॥ विख्यातो धर्मशीलश्च प्रजापालन
तत्परः ॥३॥ तस्य पुत्रोऽभवच्छ्रेष्ठो भीष्मो धर्मपरायणः ॥ गंगायां सर्वशास्त्रज्ञो ब्रह्मचर्यपरायणः ॥
स एव सांत्वपुत्रौ द्वौ शंतनोर्वै बभूवतुः ॥ चित्रांगदो महाबाहुर्विचित्रवीर्यकोऽपरः ॥५॥ चित्रांग
दो महाराज स्पर्द्धते क्षत्रियान्सदा ॥ चित्रांगदेन युद्धे स गंधर्वेण हतोऽभवत् ॥६॥ विचित्रवीर्यक
स्तत्र यक्ष्मणा पीडितोऽभवत् ॥ मृतः स रोगदोषेण दुःखिताः सुहृदोऽभवत् ॥७॥ तस्य भार्ये प्र ॥१०९॥
जानाथ द्वे काशीराजपुत्रिके ॥ अंबिकांबालिकानाम्नी बभूवतुः सुदुःखिते ॥८॥ स एव साकृतं
तत्र संतानार्थं महामुने ॥ व्यासस्य स्मरणे दृष्टस्व पुत्रस्य विशेषतः ॥९॥ स आगत उवाचेनां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वि॰मर्थं दुःखिनावरः॥मातस्ते दुःखनाशंच करिष्यामि न संशयः॥१०॥तं प्रसुवान्वसा देवी वंशवृद्धिं कु
रुष्व भो॥विचित्रवीर्यक्षेत्रे तं महाज्ञावशगो भव॥११॥नयेनितेन वंशस्य कृता वृद्धिः प्रजापते॥कुहि
तं वेषमाघ्राय यत्रौरेमे महामुनिः॥१२॥अंबिकायां मुनेर्वीर्याद्धृतराष्ट्रो बभूव ह॥पांडुरंबालिका
यां वैदास्यां च विदुरो भवत्॥१३॥यमो यं विदुरः साक्षाच्छूद्रयोनौ समुद्भवत्॥मांडव्यशापमो गार्थं नीति
ज्ञः स बभूव ह॥१४॥हर्षस्त उ०॥कथं मांडव्यशापश्च यमेशस्य पुरा भवत्॥धर्ममार्गरतस्यापि स्व परे
षु समसमोः॥१५॥मृदुल उ०॥सम्यक्पृष्टं त्वया नाथ शृणुष्व कथानकं॥पुरातनभवं ते हं कथया
मि सविस्तरं॥१६॥मांडव्यो मुनिवर्यः स वने तपसि संस्थितः॥तत्र चौरा धनं गृह्य पलन्तश्च समाय
युः॥१७॥राज्ञश्च वीरमुख्यास्ता न्निशायां गृहीतुं ययुः॥चौरांश्चौरे धनं सर्वं स्थापितं मुनिसन्निधौ॥
१८॥धनं संत्यक्ता गताश्चौरा वनेषु यत्र तत्र ते॥राजदूतै धनं दृष्टं तं गृह्य कुपिता भृशं॥१९॥ततो मुनिं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० निरस्त्रस्य मौनभावसमन्वितं ॥ ग्रह्य सं ताडयंतस्तत आययुर्नगरे स्वके ॥२०॥ राज्ञा नत्वे समाचख्युर्धनं रा०
११० हृतं यथा तथा ॥ चूतांनं चौरसंभूतं नृपोपि कुपितो भवत् ॥२१॥ शूले प्रोतव्य एवं चेद्दृष्ट्वा द्विजश्रेष्ठ सत्त
मः ॥ तथेति तन्नृपस्तं नैर्ऋत्ये हस्तिप्रोतो महामुनिः ॥२२॥ ततः दुःखसमायुक्तो मांडव्यस्तापसैः स्थितः ॥ स
स्मार स्वगुरुं विप्रं कश्यपं सृष्टिकारकं ॥२३॥ स्मृतमात्रः स तत्स्थाने कश्यपः सहसाययौ ॥ तं तथा दुःख
सं[illegible]युक्तं दृष्ट्वा सं दुःखितो भवत् ॥२४॥ उवाच तं स्वशिष्यं स भज त्वं गणनायकं ॥ सर्वविघ्न
निहंतारं भक्तेभ्यः शांतिदायकं ॥२५॥ ततस्तं मुनिशार्दूलं मांडव्यः प्रजगाद वै ॥ केन मार्गेण विघ्नेशं
भजामि तद्वद स्वामी ॥२६॥ तस्य तद्वचनं श्रुत्वा कश्यपस्तमुवाच ह ॥ गणेशस्य स्वरूपं वै भक्तेभ्यः सु
खदं परं ॥२७॥ कश्यप उवाच ॥ पंचधा चित्तवृत्तेश्च चालको यं गजाननः ॥ चिंतामणिरिति ख्यातो ११०
वेदेषु वेदवादिभिः ॥२८॥ संप्रज्ञातस्वरूपो वै देहस्तस्य महामुने ॥ असंप्रज्ञातरूपं च शिरो गणपतेः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्मृ मे ॥२९॥ तेनायं गजवक्त्रोभूद्दजशार्हे विचारय ॥ अमरूपां महामायां सिद्धिं विद्धि महामने ॥३०॥ अम
धारकरूपां त्वं बुद्धिं ज्ञानी हि सत्तम ॥ तयोः स्वामी गणाधीशो योगाकारः प्रदृश्यते ॥ तं भजस्व विधानेन
योगशांतिमयं मुने ॥ तेन त्वं विघ्नसंहीनो भविष्यसि न संशयः ॥३२॥ मुद्गल उ० ॥ इत्युक्त्वा स गणेशस्य ददौ
तस्मै महामनुं ॥ एकाक्षरं विधानेन कवचं शास्त्रसम्मतं ॥३३॥ तस्मात्तां गृह्य विप्रेशः कश्यपः स्वालयं
ययौ ॥ सोऽभ्यस्तत्र विघ्नेशमभजद्भावसंयुतः ॥३४॥ कस्त्वं गणराजस्य दधार मुनिसत्तमः ॥ कवचे
स धृते दृश्यपीडाहीनो बभूव ह ॥३५॥ तत्रैव सहसा राजा कस्मिन्कार्यार्थमाययौ ॥ ददर्श तं महावि
प्रं प्रणनाम सत्ताञ्जलिः ॥३६॥ ररोद भयसंयुक्तस्तं मुनिरब्रवीद्वचः ॥ मा रुद त्वं महीपाल नैव शापं ददा
म्यहं ॥३७॥ मदीयकर्मदोषेण शूलीप्रोतो भुजे भवं ॥ अज्ञानतालयाराजन्कृतं तेन सहाम्यहं ॥३८॥ त
तो नृपेण विप्रार्थं लोहकाराश्चिरक्षणाः ॥ समानीताश्च ते तत्र यत्नः स तो विशेषतः ॥३९॥ शूल्यमं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गो० हस्तगं तत्रैकभावसंगतं बभौ॥ निष्कासितुं न शक्तास्ते व्याकुला अभवंस्ततः॥४०॥ शास्त्रैः संछेदितं र०
१११ नैस्तच्छल्याग्रं हस्तगं विधे॥ यावन्मात्रं मुनेर्हस्ते संस्थितं तत् स्थितं बभौ॥४१॥ राज्ञा संपूजितो विप्रः प्र
ययौ यमसंनिधिं॥ उवाच कोपरक्ताक्षो यमं यमवतां वरं॥४२॥ मांडव्य उवाच॥ मया किं प्रकृतं कर्म या
परूपं वदस्व मां॥ येनाहं शूलिजं दुःखं प्राप्तः शीघ्रं महामते॥४३॥ तस्य क्रोधयुतं वाक्यं श्रुत्वा भयसम
न्वितं॥ प्राञ्जलिः प्रह्व वाचेदं कथनं कर्मसूचकं॥४४॥ यम उ०॥ बालभावे त्वया ब्रह्मन् कीटः कंटके वे
धितः॥ तत्कर्मणः फलं प्राप्तं त्वयेदं मुनिसत्तम॥४५॥ तस्य तद्वचनं श्रुत्वा क्रोधयुक्तो महामुनिः॥ ज
गाद धर्मराजं तं मांडव्यश्च प्रजापते॥४६॥ अहो बालस्वभावेन रचितं कर्म मया किल॥ अज्ञानेन महा
मूर्ख तस्येदं किं फलं भवेत्॥४७॥ अगोनीति विहीनस्त्वं पतिष्यसि धरातले॥ शूद्रयोनौ शतं वर्षा ॥१११॥
णि भुक्त्वा पुनरेष्यसि॥४८॥ अधुनाहं करोमि त्वां मर्यादां शृणु भानुज॥ अष्टवर्षवयोयुक्तैः कृतं
Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कर्महि निष्फलं॥४९॥मम भवत्तु वाक्येन गणराज प्रसादतः॥नरादिबालकैः कर्मकृतं तन्निष्फलं भवे
त्॥५०॥मांडव्यं स्वाश्रमे गत्वा लालापनपठनमं॥एकाक्षरविधानेन तोषयामास विघ्नपं॥५१॥तद्वच
स्य प्रसादेन शूल्यग्रं तस्य हस्तगं॥बभूव मांसरूपं तद्यथापूर्वकरो बभौ॥५२॥अणीमांडव्यकोनाम्ना
तदादिः स बभूव ह॥स्वल्पकालेन योगीशो गाणपत्यप्रियोऽभवत्॥५३॥नित्यं गणपतेर्विप्रो मू
र्तिपूजापरोऽभवत्॥सदा गणेशभावज्ञः सर्ववंद्यो महायशाः॥५४॥मांडव्यचरितं पुण्यं यः शृणोति
नरोत्तमः॥पठति तस्य विघ्नेशः प्रसन्नो जायते सदा॥५५॥इति श्रीमदांत्ये मौद्गले म० न० म० मांड
व्यचरित्रं नाम चत्वारिंशोऽध्यायः॥४०॥मुद्गल उवाच॥धृतराष्ट्रं च जन्मांधं सत्कायां पांडुं च कारहा॥रा
जानं ब्राह्मणः सर्वेषामपि निग्यवसुंधरां॥१॥छत्रादि राजचिन्हे स्तं ज्येष्ठ भक्तिपरायणः॥धृतरा
ष्ट्रं चकारासौ पांडुः परपुरंजयः॥२॥धृतराष्ट्रस्य भार्याभूद्गांधारी च पतिव्रता॥पांडोः कुंतिस्तथा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यो॰ मा द्रीभार्ये द्वे प्रबभूवतुः॥३॥भार्याभ्यां संयुतो राजा पांडुर्वनं जगाम ह॥४॥क्रीडार्थं तत्र निःसंसरसा महर्षि २०
११२ संयुतः॥४॥मृगरूपधरं राजा मुनिं जघ्ने शरेण सः॥ मृगयासक्तं शशाप सौ राजानं मरणोन्मुखः॥५॥
भार्यासिंसक्तरूपं मां हतवांश्च नृपाधम॥ अतस्त्वं भार्यया सक्तो मैथुनाय भविष्यसि॥६॥ तदा ते मरणं
सद्यो मम वाक्याद्भविष्यति॥ इत्युक्त्वा रेह संत्यागं च कार द्विजसत्तमः॥७॥ श्रुत्वा शापं महाघोरं रा तंतः ५
ज्यं संत्यक्त्वा वने स्थितः॥ भार्याभ्यां सहितः पांडुः कंदमूलादि भक्षयत्॥८॥ कुंत्यां समुद्भूतो धर्माध
र्मभृतां वरः॥ युधिष्ठिरो महाभागो मंत्रसामर्थ्यकारणात्॥९॥ वायोश्च भीमसेनं वै बभूव बलसं
युतः॥ इंद्रादर्जुनकः कुंत्यां धनुर्विद्यापरायणः॥१०॥ अश्विभ्यां नकुलस्तद्वत्सहदेवश्च वीर्यवान् ११२
॥मा द्र्यां धर्मतो दक्षौ बभूवतुः सुरूपिणौ॥११॥ गांधार्यां च शतं पूर्वं पुत्राणाममितौजसां
॥बभूव पुत्रिका रम्या रूपलावण्यसंयुता॥१२॥ पांडुः शापविमोहेन माद्र्यासक्तो ममार ह॥सा

तेनेहगता जाता कुंतिपुत्रानपालयत् ॥१३॥ ब्राह्मणैः सामहाभागैरानीता हस्तिनापुरे। पुत्रैः कुंतिस्तथा
भीष्मादिभिः संमानितावसत् ॥१४॥ ततो बहुगते काले दुर्योधनः सहानुजैः ॥ पांडवान्द्वेषसंयुक्तो विषा
द्दिनापि पीडह ॥१५॥ लाक्षागृहे कदानेन दग्धुं संस्थापिताः किल ॥ पांडवाः सहमाता तेरक्षिताः कर्मणा त
दा ॥१६॥ इत्यादि विविधैर्भावैर्द्वेषयुक्तः स दुर्मतिः ॥ पीडयामास तान् शूरांस्ततो भीष्म उवाच ह ॥१७॥
अर्द्धराज्यमतो गृह्य गच्छध्वं पांडवाः पुरात् ॥ इंद्रप्रस्थं नगो जग्मुर्धृतराष्ट्रप्रचोदिताः ॥१८॥ तत्र दिग्विज
यं कृत्वा श्रियायुक्ताश्च ते भवन् ॥ त्वलक्षेषां महाभागः पक्षग्राहो बभूव ह ॥१९॥ राजसूयमखं चक्रुस्ताशु
शुभुः पांडवास्ततः ॥ तत्र दुर्योधनो राजा मनसि दुःखितोऽभवत् ॥२०॥ धृतराष्ट्रेन दुर्बुद्धिरानयामा
स पांडवान् ॥ द्यूतेन तान्महाभागान् जित्वा संहर्षितोऽभवत् ॥२१॥ वनेषु स्थापयामास पांडवान् सा
हसप्रियः ॥ वर्षाणि द्वादशानि सवर्षं गुप्तं नमानतथा ॥२२॥ सत्क्षमोऽन्याहिकं सर्वं पांडवा वनमाययुः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो॰ तत्राजगाम तान् द्रष्टुं बलभद्रेण संयुतः ॥२३॥ पांडवान् सांत्वयामास क्रोधयुक्तो बभूव सः ॥ हनिष्या नं॰
११६ मि महाहुष्टं दुर्योधनं युधिष्ठिर ॥२४॥ कुरुराज्यं मया दत्तं शत्रुहीनं विशेषतः ॥ ध्रुवं तं तं ततः कृष्णं जगा
द स युधिष्ठिरः ॥२५॥ युधिष्ठिर उवाच ॥ धर्मयुक्तं तया राज्यं करिष्यामि जनार्दन ॥ नाहमधर्मसंयुक्तं राज्य
मिच्छामि केशव ॥२६॥ अतः कोपं महाबाहो मम नियच्छ वाक्यतः ॥ वद त्वं धर्मसंयुक्तमुपायं राज्यलाभ
दं ॥२७॥ ततः कृष्णः स्वयं तत्र कोपहीन उवाच ह ॥ युधिष्ठिरं सत्रैपयाम्याव भिस्तं समन्वितं ॥२८॥ इति श्री
मदांत्ये मौद्गले॰ न॰ म॰ युधिष्ठिरकृष्णसमागमो नामैकचत्वारिंशोऽध्यायः ॥४१॥ मुद्गल उवाच ॥ शृणु द
क्ष महाभाग चरितं विघ्नपस्य च ॥ कृष्णः संकथयामास पांडवानमितद्युतिः ॥१॥ कृष्ण उ॰ ॥ युधिष्ठिर ॥११३॥
महापुण्यशील शृणु वचो महत् ॥ येन त्वं संकटाद्धन्न्मुक्तः सन् सुखमाप्स्यसि ॥२॥ इतिहासं पुरात
नं कथयामि समासतः ॥ सर्वविघ्नहरं पुण्यं महोदरगुणैर्युतं ॥३॥ एकदा देवदेवेशो विष्णुर्वैकुंठसंस्थि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तः॥ लक्ष्म्यासहविलासेन विषक्सेनादिभिर्वृतः॥४॥ गरुडेन समीपस्थेन सदाहर्षसंयुतः॥ अप्स
राभिश्च गंधर्वैर्देवैः संसेवितो विभो॥५॥ नमुवाच महाभाग भगवंतं सनातनं॥ शृणु वत्स सुसर्वश्च वे
षु लक्ष्मीर्विनयसंयुता॥६॥ लक्ष्मीरु०॥ स्वामिन्निच्छामि विज्ञातुं मम हंसन्ततं गतिः स्त्रीणां भर्तास
मं किंचिन्नैवास्ति वेदभाषितं॥७॥ हंसा साक्षाद्देवदेवेशः शंकराद्यैः सुसंस्तुतः॥ षडैश्वर्यसमायु
क्तो भक्तेभ्यः सिद्धिदायकः॥८॥ देवानां परमाप्तिस्त्वत्तो वै नात्र संशयः॥ सर्वेभ्यो मुक्तिदाता
त्वं मुक्तिदाता न थाप्यवान्॥९॥ सर्वेषां पालकस्त्वं वै न च पातान विद्यते॥ नरपिध्यानसंयुक्तो
भजसे कं वद स्वमे॥१०॥ एकांते पूजसे नाथ कं देवं विश्वेश्वरः॥ आनंदं परमं ब्रह्मानंदं वैतं श्रु
तिर्मुखात्॥११॥ विस्मापयति मां चित्ते ध्यानं ह्यवाच्यं तं प्रभो॥ अधुनाहं च निर्लज्जा पृच्छामि
नाथ ते नमः॥१२॥ संशयछेदनार्थं मां वद विस्तरे विशेषतः॥ दासी ते पादपद्मस्य हृद्दीन

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ० सह्रासम॥१३॥सर्वत्र समरूपस्त्वं सदानंदमयप्रभः॥ नस्मात्परं किमात्रा[illegible]स्ति मोहयसि कथं ज ल०
११५ नान्॥१४॥ध्यानेन पूजनेनैव फलं किं नेभविष्यति॥ तथापि तं किमर्थं भो ध्यानयुक्तोसि केशव॥
१५॥ब्रह्मोवाच॥ इति प्रियावचः श्रुत्वा प्रहस्य तां जनार्दनः॥ समालिंग्य प्रजानाथ उवाच जलधेः सु
तो॥१६॥ विष्णुरुवाच॥ शृणु प्रिये प्रवक्ष्यामि तया पृष्टं शुभप्रदं॥ तारकं सर्वभूतानां सर्वेभ्यः सिद्धि
दायकं॥१७॥ न मोहाय जनानां वै ध्यानं करोमि नित्यदा॥ कुलदेवं गणेशानं भजामि सर्वभावतः॥
१८॥ गुणेश्वराद्वयं देवि समुत्पन्ना महेश्वराः॥ पंचदेवा महाभागैस्तेन संस्थापिताः पदे॥१९॥ गु
णेशेन तपस्तप्त्वा राधितो गणनायकः॥ गणेशेन गुणेशाय स्थापितः स्वपदे पुरा॥२०॥ ज्ञानस ११५
नादिसंयुक्तो जातस्तस्माद्गजाननः॥ सोपि तं भजते देवि गणेशं भक्तिसंयुतः॥२१॥ तथा वयं महेशाना
गणेशं सेव्य सर्वदं॥ ज्ञानानानादिसंयुक्ताः स्वस्वकार्यप्रवर्तकाः॥२२॥ अनंतसंभावसंयुक्ता भजा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मोनि समाहृतात्॥सर्वेसर्वार्थदास्याकंकुलदेवं प्रकीर्तितः॥२३॥विष्णोर्वचनमाकर्ण्यलक्ष्मीर्विस्मि
तमानसी॥जगादवृतंमहाविष्णुं विनयेनसमन्विता॥२४॥लक्ष्मीरुवाच॥कोसौगणेश्वरोनामावदत
स्यविशेषतः॥स्वरूपंकुलदेवस्यभजिष्यामिजनार्दन॥२५॥विष्णुरुवाच॥ सम्यक्पृष्टंत
याद्देवि शृणुतस्यस्वरूपकं॥वदामिस्नेहयुक्तोहंयदितंबोधयिष्यसि॥२६॥स्वानंदेवसतेसोपि
गणेशोब्रह्मनायकः॥स्वानंदःपंचधाजातःशृणुतस्यकथानकं॥२७॥नामरूपात्मकंदेवि जग
तिब्रह्मणिसंस्थितं॥तत्रस्वानंदकोयोगोसद्रूपःपरिकथ्यते॥२८॥असत्समृतरूपंयसदात्मवाच
कंप्रिये॥स स्वरूपंचतद्विद्धिसहस्वानंदउच्यते॥३०॥त्रिप्रबोधंत्रिभिर्हीनंमोहहीनंस
दामतंनेनिरूपंमहाभागेस्वानंदोव्यक्तउच्यते॥३१॥चतुर्णायोगभावेयःसमाधिर्जायतेकिल
॥स्वानंदःपंचमोह्यत्रसर्वसंयोगउच्यते॥३२॥सर्वेमायामयःप्रोक्तोगणेशोवेदवादिभिः॥चतु
+नंदप्रकीर्तितः॥२९॥ससासत्सविहीनंयत्सत्सासत्समयंतथा॥आनंदात्मकरूपंतत्समस्वा+५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गो॰ ११५ दूरिचित्तं तेन नेषु खेलति निःसदा ॥३३॥ मायाहीन तयाबुद्धिर्योगवाचको भवेत् ॥ न तत्र कस्य संयो न॰
गस्तस्यापि कथ्यते बुधैः ॥३४॥ मायायुक्तोऽथ हीनत्वं नरे च भ्रांतिदायकं ॥ ताभ्यां हीनो गणेशो संयो
गरूपः प्रकथ्यते ॥३५॥ तस्य शांतिर्भवेद्वियोगिनो नात्र संशयः ॥ अतो योगस्वरूपासा कथ्यते शां
तिरुत्तमा ॥३६॥ मनोवाणीमयं सर्वं गकाराक्षरवाचकं ॥ मनोवाणीविहीनं वै णकाराक्षररूपकं ॥
३७॥ तयोः स्वामि गणाधीशः पश्यवेदे श्रुति स्मिते ॥ अतस्तं भक्तिसंयुक्तो भजामि सर्वनायकं ॥३८
भ्रमरूपां महामायां सिद्धिं जानीहि मानवे ॥ सिद्ध्यर्थं सर्वलोकोऽश्र भ्रमं तत्र भ्रमत अतः ॥३९॥
भ्रमधारकरूपं त्वं बुद्धिं जानीहि निश्चितं ॥ बुद्ध्या बुध्या पदार्थेषु भ्रमो मा स्तिः प्रजायते ॥४०॥ त
योः स्वामि सदा योगशांतिरूपो य उच्यते ॥ तस्य भजनमात्रेणा ब्रह्मभूता भवं सतः ॥४१॥ इत्युक्त्वा ॥११५॥
विरराम अथ स्वयं नारायणः प्रभुः ॥ श्रुत्वा समुद्रपुत्री सा विस्मिता मानसे भवत् ॥४२॥ इति श्री

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

महांसे मौद्गले० न० म० लक्ष्मीनारायणसंवादे वर्णनं नाम द्विचत्वारिंशोध्यायः ॥४२॥ वत्स उवाच ॥
धर्म श्रृणु महाभागकथां पापापनोदिनीं ॥ लक्ष्मी स्वं पुनः प्राह गणेशज्ञानलालसा ॥१॥ लक्ष्मीरु
वाच ॥ भगवन् भवता प्रोक्तं महाशांतिप्रदं परं ॥ तस्य पदं सुशांसं सर्वं तत्रोपायं वदस्व मे ॥२॥ नाराय
ण उवाच ॥ षडक्षरेण मंत्रेण यदि तं साधयिष्यसि ॥ तदा ते गणनाथः स प्रसन्नः प्रभविष्यति ॥३॥
तस्य दर्शनमात्रेण शांतिं प्राप्स्यसि निश्चितं ॥ तमाराधय यत्नेन तपसा योगभाविता ॥४॥ एवमु
क्त्वा महाविष्णुर्ललितास्पदे ददौ मनुं ॥ षडक्षरं महाँक्षये विधियुक्तं विधानतः ॥५॥ ततं सा तं प्रणम्यैव
तपसे वनमाययौ ॥ हिमालयशिरःसंस्था तताप तप उत्तमं ॥६॥ षडक्षरविधानेन ध्यात्वा हेरंबं गजा
ननं ॥ जजाप मंत्रराजं तं नासाग्रनयना सती ॥७॥ दृढं क्रियापरा चैव तस्य मूर्तिं स्थाप्य गजाननं ॥ नि
राहारा पुनर्देवी च भूवलपसि स्थिता ॥८॥ शतवर्षे गते पूर्णे सा स्थिता च महाविशेषितां ॥ नामाय योगग्णा

ल८

मो० धीशो भक्त्याबद्धोधरायते ॥९॥ नमोगतं महादेवी प्रणनामचतुर्भुजं ॥ महोदरं त्रिनेत्रं च परस्वादिधरं ग०
११६ प्रभुं ॥१०॥ मूषकध्वजिनं पूर्णं मूषकोपरि संस्थितं ॥ सिद्धिबुद्धिसमायुक्तं नानाभूषणभूषितं ॥११॥ चिं
तामणिमणिं बिभ्रतं गले ज्योतिषांपते ॥ शोषनाभिं गजास्यं वै पीतवस्त्रैश्च शोभितं ॥१२॥ ननस्तं
पूजयामास नानोपचारकैः प्रभुं ॥ प्रणम्यो स्थापनुष्टाव रत्नाकरपुत्रं सती ॥१३॥ महालक्ष्मीरुवाच ॥
नमो महोदरायैव नानालीलाधरायते ॥ सदास्वानंदसंस्थाय भक्तिगम्याय वै नमः ॥१४॥ चतुर्बा
हुधरायैव चतुर्णां चालकायते ॥ सुदात्वानंद [illegible] वै नमः ॥ [illegible] मूषकारूढरू
पाय मूषकध्वजिने नमः ॥१५॥ अनंताननदेहाय अनंतविभवायते ॥ अनंतहस्तपादाय सदा ॥११६॥
नंताय वै नमः ॥१६॥ चराचरमयायैव चराचरविवर्जिता ॥ योगशांतिप्रदात्रे ते सहायोगस्वरू
पिणे ॥१७॥ अनादये गणेशाया दिमध्यांतस्वरूपिणे ॥ आदिमध्यांतहीनाय विघ्नेशाय नमो नमः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥१८॥ सर्वादिपूज्यकायैव सर्वपूज्याय ते नमः॥ सर्वेषां कारणायैव ज्येष्ठराजाय ते नमः॥१९॥ वि
नायकाय सर्वेषां नायकाय विशेषतः॥ ढुंढिराजाय देवं भक्तेशाय नमो नमः॥२०॥ सृष्टिकर्त्रे स्थि
तिहर्त्रे पालकाय नमो नमः॥ त्रिमूर्तीनाय देवेशाय गुणेशाय नमो नमः॥२१॥ कर्मणां फलदात्रे च
कर्मणां चालकाय ते॥ कर्माकर्मादिहीनाय लंबोदर नमो नमः॥२२॥ योगेशाय च योगिभ्यो योगदा
य गजानन॥ सदा शांतिधनायैव ब्रह्मभूताय ते नमः॥२३॥ किं स्तौमि गणनाथं त्वं स्वदा ब्रह्मपतिं प्रभो
॥ अतस्त्वां प्रणमामि च ते न तुष्टो भव स्वदः॥२४॥ यस्याहं स्तवनं दृष्ट्वा सफलो मे भवो भवत्॥ ध
न्योऽहं जनको नाथ पयाहं त्वं गजाननः॥२५॥ एवं स्तुत्वा बली सातं भक्तियुक्तेन चेतसा॥ साश्रुनेत्रान
नैर्धिवाक्यं त्वां युधिष्ठिर॥२६॥ तामुवाच गणाधीशो वरं वृणु मनेप्सितं॥ दास्यामि ते महाल
क्ष्मि भक्तिभावेन तोषितः॥२७॥ तपावृतं च मे स्तोत्रं भुक्तिमुक्तिप्रदं भवेत्॥ पठतां शृण्वतां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो॰ १९८ हे विनानाकार्यकरं तथा ॥ २८ ॥ पुत्रपौत्रादिकं सर्वं लभते लोक पावनः ॥ धनधान्यादिसंभूतं सुखं विंद गः

ति मानवः ॥ २९ ॥ गणेशवचनं श्रुत्वा महालक्ष्मीर्जगाद तं ॥ हर्षेण महता युक्ता प्रणम्य करसंपुटा ॥ ३० ॥

महालक्ष्मी [illegible] रुवाच ॥ यदि प्रसन्नभावेन वरदोसि महोदर ॥ तदा ते भक्तिमुख्यां मे देहि नाथ नमो

स्तु ते ॥ ३१ ॥ अस्माकं कुलदेवस्त्वं तत्र त्वां गणनायक ॥ भजामि भावयुक्ताहं तथापि शृणु मे वचः ॥

३२ ॥ मनश्चंचलभावेन संसारे गच्छति प्रभो ॥ संसारः पुत्रमोहाख्यस्तदर्थं भ्रमते सदा ॥ ३३ ॥ अत

स्त्वं पुत्रभावेन भव मे विघ्नवारण ॥ तत्र त्वां पुत्रवात्सल्येन भजामि निरंतरं ॥ ३४ ॥ देवभावेन ते मूर्त्तिं

गजवक्त्रादिचिन्हितां ॥ भजामि च तथाप्यहं संसारे पुत्ररूपिणं ॥ ३५ ॥ योगरूपः स्वयं साक्षात्साध्यस्य ॥ ११८ ॥

पुत्रो भविष्यसि ॥ तेन योगस्वरूपा सा शांतिः प्राप्ता न संशयः ॥ ३६ ॥ नव माता पिता चैव बंधपयुक्तो

यदि प्रभो ॥ तदा वेदादिकं सर्वं मिथ्यारूपं भविष्यति ॥ ३७ ॥ अतो मे पुत्रतां याहि तथाहं गणनायक ॥

त्वय्यभूत्तान संदेहो भजामि भक्तिसंयुता ॥३८॥ मह्यमेव वरो नाथ दातव्यः करुणानिधे ॥ नान्यं याचे महायो
गदेव देवेशाते नमः ॥३९॥ इति लक्ष्म्या वचः श्रुत्वा मेधोदरः प्रहर्षितः ॥ उवाच तां समाबद्धो भावपूर इति
स्मृतः ॥४०॥ तव पुत्रो भविष्यामि त्वन्नारेर्नाऽपायपद्मे ॥ हे सत्ये तत्प्रसेवार्थं भक्तिपरत्वलालसः ॥४१
प्येयमि धसिदे विलं नं नं लभसि निश्चितं ॥ मदीयवरदानेन योगिवं या भविष्यसि ॥४२॥ आदौ त्वया
महादेवि मदीयभजनं कृतं ॥ तेन शान्ति पुत्वा आत्मा योगस्तामोहवर्जिता ॥४३॥ ततस्त्वां तपसा वि
प्रो भृगुः पुत्रीं चकार ह ॥ सा त्वं तपो हि जस्यैव शापेन मोहसंयुता ॥४४॥ समुद्रेण पुनो देवी तथै
वास्तधिता पुरा ॥ तस्य पुत्रि समापन्ना त्वं विष्णोर्दपि नासह ॥४५॥ तेन त्वं विष्णुनिर्जातामहीया
नात्र संशयः ॥ विष्णुना बोधिता मां त्वं प्राप्ता योगस्य सेवया ॥४६॥ अधुनास्मरसर्वं तस्मादितं ते
मया न चैव विष्णुना थादिकाले त्वं पुत्रार्थे याचितो भवं ॥४७॥ त्वं तथा पुत्रभावार्थं याचसे मां समुद्र

मो० ज्ञेमकरोमिते हितं रवि विलोरेवं वनसंज्ञयः ॥४८॥ ए यमुक्त्वा गणेशस्तां पयोरत्नानंदके पुरे ॥ अंत र०
११८ र्दधे स्वमात्मानं लक्ष्मीः खिन्नातनोभवत् ॥४९॥ स्मृत्वा योगबलेनैव पुरानन भवां कथां ॥ विस्मि
ता मानसे ज्ञात्वा सस्मार हृदि रत्ननं ॥५०॥ मूर्तिं तत्र प्रतिष्ठाप्य ब्राह्मणैर्वेदपारगैः ॥ पूजयित्वा पयो
स्नानं लक्ष्मीर्भक्तिसमन्विता ॥५१॥ प्रणम्य तं महाविष्णुं जगाद सर्वमंजसा ॥ पूजां तं सोपि सं
श्रुत्वा हर्षितस्तामुवाच ह ॥५२॥ धन्यासि जलधेः पुत्रि साक्षाद्दृष्टस्त्वया विभुः ॥ पुत्रभावेन ते गेहे
आगमिष्यति विघ्नपः ॥५३॥ ॥ इति श्रीमद्गणेशे मौद्गले ० तृ० म० लक्ष्मीवरप्रदानवर्णनं नाम त्रिच
त्वारिंशोऽध्यायः ॥४३॥ युधिष्ठिर उवाच ॥ नवदूलमुखांभोजान्निःसृतां सर्वपापविनीं ॥ कथां श्रु ॥११८॥
त्वा न मे तृप्तिर्जायते मृतपानवत् ॥१॥ ज्ञानारिर्नाम दैत्येशः कस्य पुत्रो बभूव ह ॥ किं कर्म तस्य यत्
स्तुवे ष्टितं वद विस्तरात् ॥२॥ यदर्थं गणराजः स देहधारी बभूव ह ॥ न सामान्यं चरित्रं वै दैत्येशस्य

जगद्गुरो ॥३॥ कथं विघ्नेशपुत्रोभूद् गणेशो भक्तनायकः ॥ चरित्रं किं कृतं तेन विस्ताराद्वद वै शिव ॥४॥ मुद्ग
लउवाच ॥ युधिष्ठिरस्य भावं स ज्ञात्वा वृष्णिकुलोद्भवः ॥ नारायणः कथां तस्मा अवदद्दुःखनाशिनीं ॥५॥
कृष्णउवाच ॥ युधिष्ठिर कथां रम्यां शृणु पापप्रणाशिनीं ॥ क्षस्मूतप्रहांदुष्टे अश्रित्राश्रितकां प्रभो ॥६॥
दुर्बुद्धिर्नाम दैत्येशो हतो विघ्नहरेन च ॥ शिवपुत्रस्वरूपेण त्रैलोक्य विजयी पुरा ॥७॥ तस्य पुत्रोयमुत्प
न्नः संस्थितः स्वगृहे तदा ॥ बालभावाच्च धर्मज्ञ ज्ञानारिर्नामको भवत् ॥८॥ प्रल्हादः स्वसुतां तस्मै
ददौ हर्षसमन्वितः ॥ रूपलावण्यसंयुक्तां सुकलां नामतः स्वयं ॥९॥ स तु यौवनमापन्नो दुर्मतिं पि
तरं सदा ॥ सस्मार दुःखसंयुक्तो गणेशेन हतं पुरा ॥१०॥ स शुक्रमुपसंगम्य विद्यां पंचाक्षरीमगात् ॥
शैवीं तथा वने गत्वा राधयामास शंकरं ॥११॥ वायुभक्षो महादैत्यो ज्ञानारिर्यतिमास्थितः ॥ तताप त
प उग्रं स वर्षाणामयुतं प्रभो ॥१२॥ ततस्तं प्रययौ शंभुः पार्वत्या सहितः स्वयं ॥ उवाच तं महाभक्तं भक्त

वांछाप्रपूरकः॥१३॥शिवउवाच॥वरंवृणुमहाभागतपसातोषितस्त्वया॥दास्यामिवांछितंदैत्ययद्य
पिस्यात्सुदुष्करं॥१४॥शिवस्यवचनंश्रुत्वाप्रबुद्धोदैत्यपुंगवः॥दृष्ट्वाग्रेशंभुंमुदायुक्तःप्रणनामकृतां
जलिः॥१५॥ततस्तंपूजयामासपुनःप्रणम्यदैत्यपः॥तुष्टावसुस्थिरोभूत्वाशंकरंभक्तवत्सलं॥१६
दानारिरुवाच॥नमस्तेशंकरायैवपार्वतीसहितायते॥वृषध्वजायशैलादिवाहनायनमोनमः॥१७
अव्यक्तायचदेवायशिवायशूलधारिणे॥निर्गुणायगुणानांत्वेचालकायनमोनमः॥१८॥सदा
शिवायमायायाआधारायनमोनमः॥मायामोहविहीनायशंभवेतेनमोनमः॥१९॥सृष्टिकर्त्रे
चपात्रेत्तेसंहर्त्रेत्रिस्वरूपिणे॥अनाथायचसर्वेषांनाथायपरमात्मने॥२०॥चराचरस्वरूपाय ॥११९॥
चराचरात्मनेनमः॥महादेवायदेवानांपतयेतेनमोनमः॥२१॥नमोनागातिरूपाययोगिध्येयाय
तेनमः॥योगिनांपतयेचैवमहेश्वरनमोस्तुते॥२२॥धन्योवंशोमदीयोद्ययेनदृष्टोमहेश्वरः॥तया

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्नानं पिता माता धन्यो मे नात्र संशयः ॥२३॥ प्रसन्नोसि महेशान तदा देहि महाप्रभो ॥ चराचरस्य वैरा
ग्येन स्यान्मृत्युर्न मे भवेत् ॥२४॥ यं यमिच्छामि देवेश तं तं सिद्ध्यतु सर्वदा ॥ आरोग्यादि समायुक्तं मां
कुरु परमेश्वर शिव ॥२५॥ तथेति शिववक्त्रेण मंत्रं दुर्निवारकं स्वकं ॥ स दैत्यो हर्षितो संतं स्वगृहं प्रसपद्यत
॥२६॥ ज्ञानारिकृतमेतत्तु स्तोत्रं पठति यो नरः ॥ श्रुणोति वा करस्तस्मै वांछितं ददते परं ॥२७॥ इति श्री
मद्रामसेनोमलले० न० म० ज्ञानारिवरप्राप्तिवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ सूत उवाच ॥
ज्ञानारिर्वरसंयुक्तो दैत्यः प्रबलितो भवत् ॥ श्रुत्वैव गणसंविप्रैः सो भिषिक्तो राज्यकर्मणि ॥१॥ नमु
चिः शंबरश्चैव कालासुरः प्रतापवान् ॥ जंभो बल्लासुरः पंच प्रधानास्तस्य चाभवन् ॥२॥ नाना
दैत्यगणैर्युक्तः पृथिवीं सप्तसागरां ॥ सद्वीपां दैत्यपो जित्वा तथा पातालमोजसा ॥३॥ नतः स्वर्गेय
यौ दैत्यो देवपैश्च समावृतः ॥ इंद्रः सुरगणैः सार्द्धं पपाल भयसंकुलः ॥४॥ ज्ञानारिः सत्यलोकं च प

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो०
१२०

यौ दैत्यसमन्वितः॥ तत्र ब्रह्मा स्थितो देवैर्ब्रह्मा दैत्यं पपाल सः॥५॥ विष्णुर्वैकुंठमुत्सृज्य पपाल च यु- ग०
धिष्ठिर॥ दैत्यस्तत्र समागम्य हर्षितः संबभूव ह॥६॥ ततः कैलासमानंदाज्जगाम दैत्यनायकः॥ शं-
करं प्रणिपत्याह कैलासं देहि मे प्रभो॥७॥ नोचेद्युद्धेन जेष्यामि त्वामहं नात्र संशयः॥ शंकरः श्रुति-
तो भूत्वाकंपितः प्रददौ तथा॥८॥ पपाल भयसंयुक्तः सगणः सवनं ययौ॥ कैलासे संस्थितो दै-
त्यो नंदनेन हमोहितो भृशं॥९॥ ततः स्वर्गपुरे दैत्यं स्थापयामास निर्भयः॥ ययौ स्वनगरे धर्म दै-
त्यपैः संवृतो बभौ॥१०॥ सुकेलायां महादैत्या पुत्रोभवद्युधिष्ठिर॥ सुमुहूर्ते महातेजा रूपेणाप्र-
तिमः परः॥११॥ पुत्रजन्म प्रहृष्टः स ददौ दानानि भूमिप॥ जातकर्मादिकं कर्म चकार विधिपूर्वकं ॥१२०॥
॥१२॥ स देवकर्मविनाशार्थं प्रेषयामास दैत्यपान्॥ तैः सर्वत्र कृतो नाशः कर्मणां भूमिमंडले॥१३॥
न स्वाहा न वषट्कारो न स्वधा कुत्र विभो॥ कर्महीनेन देवाश्च दुःखिता अभवंस्ततः॥१४॥ उ

पोषणसमायुक्ता विचारंचकुराहराल॥ज्ञानारिनाशनार्थायनिमापुरस्तो विचक्षणाः॥१५॥नैवबहुतरेका
लेकिंकुर्मइतिविह्वलाः॥तत्रविष्णुरुवाचेदंवचनंहितकारकं॥१६॥विष्णुरुवाच॥चराचरमयंसर्वंतस्मात्त
स्यभयंनहि॥अतोविघ्नेश्वरंदेवाभजामोनात्रसंशयः॥१७॥सर्वबुद्धिपतिःसाक्षाद्बुद्ध्याधिष्ठितंप्रकारा
ति॥तेनतंनिहनिष्यामःसिद्धिदातासतोभवेत॥१८॥विष्णोर्वचनमाकर्ण्यसाधुसाधुदिवौकसः॥
ऊचुस्तंतेनतोढुंढिमभजन्नुभक्तिसंयुताः॥१९॥ध्यात्वाक्षरेणमंत्रेणध्यात्वादेवंगजाननं॥अतोषयंन
मराःसर्वेनानातपान्विनाविभो॥२०॥गतेवर्षेगणाधीशःप्रसन्नःससमाययौ॥यत्रौस्वनेचल
क्ष्म्यास्तामुवाचवचनंहितं॥२१॥शृणुमानस्त्वयापूर्वंयाचितःपुत्रकाम्यया॥सोहंतेपुत्रभावेन
संस्थितःपश्यभामिनि॥२२॥एवमुक्त्वांतर्दधेसोगणेशोगणवल्लभः॥लक्ष्म्युत्संगेततोबालो
भूत्वाविक्रीडविष्टपः॥२३॥जजागरमहालक्ष्मीर्गणेशंमनसास्मरत्॥ददर्शातिजशय्यायांबा

मो० बालंमुंडाधरंपरं॥२४॥विस्मिताहर्षितासंतंनारायणंजगादह॥वृत्तांतंसामहाभागादर्शयामासविघ्न न०
१२१ पं॥२५॥गणेशंप्रणनामाथतुष्टावसस्त्रिकःप्रभुं॥गाणपत्यैर्महासूक्तैर्हर्षयुक्तःसमाधवः॥२६॥धन्यो
हंसर्वभावेनत्वदंघ्रियुगदर्शनात्॥पुत्रभावेनमांनाथपालसितंनेसंशयः॥२७॥ततस्तत्रामराःस
र्वेमुनयश्चसमागताः॥विस्मितास्तुष्टुवुस्तंतेनानास्तोत्रैर्युधिष्ठिर॥२८॥ततस्तोजानकमपिचक्रुःप
रमभाविताः॥एकादशदिनेतस्यमुनयोनामचक्रिरे॥२९॥द्वंद्वभावविहीनोयंसाक्षादानंददायकः
सम्मोहद्वेषुसर्वेषुनष्टिकारविवर्जितः॥३०॥अतोनामास्यचैवेशाःपूर्णानंदइतिस्फुटं॥कुरुतसर्व
दानंददायकोनोभविष्यति॥३१॥तथेतिनामतेःसर्वैःकृतंतस्यमहात्मनः॥पंचमेवत्सरेबंधंचक्र ॥१२१॥
रविघ्नुरव्ययः॥३२॥यस्ययस्यगृहेदेवोसंभूतेपुत्ररूपिणौ॥विद्याविद्येनतोहिंसांतपसाराधि
तोविभो॥३३॥तस्मैददौमुराषुर्व्रःकश्यपःसप्रहर्षितः॥पूर्णानंदायविघ्नेशोनामभक्तिसंयुतः॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥३४॥ द्वादशाब्दवयोयुक्तो बभूव गणनायकः॥ बालक्रीडनकेनैव मोहयामास देवपान्॥३५॥ स्तनपा
नादिकं तस्य भोजनाच्छादनादिकं॥ लक्ष्मीः स्वयं चकारैव हर्षयुक्तेन चेतसा॥३६॥ विलुलं लालयामास नि
संदेवगणो वृतः॥ कश्यपश्च तथा विप्रेंद्रा मानरं युधिष्ठिर॥३७॥ इति श्रीमद्गांधे मौद्गले० न०म० पूर्णानं
दावतारो नाम पंचचत्वारिंशोध्यायः॥४५॥ युधिष्ठिर उवाच॥ दक्षदक्ष महाभाग वद दैत्यस्य चेष्टि
तं॥ पूर्णानंदः कथं दैत्यं जघान कौतुकं महत्॥१॥ चराचराद्रूपं तस्य नास्ति नाशाय तत्प्रभो॥ अत्रआ
श्चर्यसंभूतं चरित्रं मे प्रभाषते॥२॥ मुद्गल उवाच॥ युधिष्ठिरवचः श्रुत्वा दक्षस्तं प्रमुवाच यत्॥ तदेव
शृणु दक्षत्वं चेष्टितं गणपस्य च॥३॥ दक्ष उवा० पुत्रो बभूव दैत्यस्य ज्ञानारेः सर्वसंमतः॥ एकाद
शदिने तत्र ब्राह्मणः प्रपयो गृहे॥४॥ सुबोध इति नाम्नातं चक्रे दैत्यस्य सच मः॥ द्विजेरिता द्वि
जेभ्यस्तो द दुर्दानानि हर्षिताः॥५॥ सतु ज्ञानसमायुक्तो गणेशो दैत्यजो नृप॥ बालभावे पि विघ्नेशं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गो०
१२२

चिंतयामाससर्वदा॥६॥स्नानपानादिकंबालःसस्मारनकदाचन॥मातातस्मैयदास्मत्वास्नान दे०
पानंददौयपो॥७॥एवंसोपिस्वमातस्थंस्नानपानंचकारह॥सदाध्यानसमायुक्तःसस्मारग
णपंहृदि॥८॥ततःपंचतथासप्तमासास्तस्यगताविभो॥वयसिसततस्त्वेकक्रीडनंश्वपुत
स्तभो॥९॥धूलिमध्येस्वहस्तेनस्वकारगणपाकृतिं॥तत्रधूलिप्रविक्षेपपूजोपचारकारणा
त॥१०॥त्रिकालपूजनंतत्रचकारनियमेनसः॥ध्यानयुक्तेनविघ्नेशंममभज्ञ्चततःपरं॥११॥
एकदाभोजनार्थंचसंस्थितोवैसनायकः॥ज्ञानारिस्तांददर्शैवक्रीडंतंबालभावतः॥१२॥
गणेशाकारमूर्तिंवैचकारधूलिमध्यतः॥पूजयामासतांपुत्रोधूल्युपचारजैस्ततः॥१३ ॥१२२॥
॥ततोतिकुपितःपत्नीमुवाचविस्मयान्वितः॥ममपितृनिहंतारंभजतेयंनबालकः॥
१४॥अधुनानिश्चयाभार्यानहन्मितेसुतंप्रिये॥सावधानमनाभूत्वाचेष्टाहीनंसुतंकुरु॥१५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पितृद्वंतारमेवायंकरोतितनयोयतः॥पुनर्दृष्टोमयात्वेनंहनिष्यामिसुतंप्रिये॥१६॥सातथेतिसमुत्था
यस्थितातिनयसंयुता॥पतिव्रतामहाभागापतिवाक्यपराभवत्॥१७॥संयतागमनेकालेभर्तुः
सापुत्रमाददे॥ताल्लुयामासतंतत्रयथानृपोनपश्यति॥१८॥ततःसुबोधनामासौघर्मार्दुर्ध्ववयस्थि
तः॥चकारभाषणंतत्रवात्यास्यष्टस्वरूपया॥१९॥नमोहेरंबविघ्नगणेशायमहोदर॥लंबोदरायविकटा
यहुंदयेनमोनमः॥२०॥इत्यादिभावयुक्तश्चसस्मारगणपंसदा॥अनन्यमनसाधर्मतथापूजापरायण
॥२१॥ततोमातास्नेहवशात्पुत्रंगृह्ययुधिष्ठिर॥भर्तुरागमनेकालेदूरस्थंचक्रेसखीजनैः॥२२॥यत्नमाश्रा
यसाहेवीपुत्रंररक्षनिरंतरं॥कदाचित्सास्वपत्यावैत्यक्तापुत्रंनपश्यच॥२३॥निद्रितोयंसुतःस्वामिन्नेवं
वदेन्महासती॥कालातिक्रमणंचक्रेदुःखयुक्तायुधिष्ठिर॥२४॥पंचमेव्रतबंधंचज्ञातारिःतस्यहर्षिता
॥चकारससुतस्तत्रगणेशंमनसास्मरन्॥२५॥कर्मभंगभयात्सोपिपूजांचक्रेसुमानसी॥ततःकर्म

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो०
१२२

समाप्यैव नजाम सकलां नृप ॥२६॥ ततो गुरुकुले राज्ञा स्थापितो भूत् सुबोधकः ॥ तत्रैव ऋषिसुताः सर्वे नानारू २
पाः स्थिता बभुः ॥२७॥ शुक्रशिष्या महाभागास्तान् सर्वान् यत्नतः सदा ॥ विद्यां तां शिक्षयामासुरासुरीं
देवमोहिनीं ॥२८॥ तत्रायं राजपुत्रश्च गुरुभिर्मानितो भृशं ॥ अतिष्ठत् विघ्नराजं स संस्मरन् भक्तिलालसः
॥२९॥ गुरुभिरासुरीं विद्यां शिक्षितुं राजनंदनः ॥ समानितश्च सो पिताश्रमस्थः स्थितो भवत् ॥३०॥ गु
रुभिः कथितं यच्च श्रुत्वा विस्मितमानसः ॥ उवाच तान् महाबुद्धिः सुबोधो विषयात्मकान् ॥३१॥ सुबोध
उ० ॥ ब्राह्मणा ब्रह्मनिष्ठाश्च सदा योगपरायणाः ॥ गाणपत्या विशेषेण भजंते गणनायकं ॥३२॥ मे
हामेदादिभिर्हीनं गणेशार्थं विचक्षणाः ॥ मोहदामासुरीं विद्यां सत्क्वा चेंद्या भवं सतः ॥३३॥ भवंतो
ज्ञानशीलाश्च किं मां दुर्हंति विप्रया ॥ गलतोज्ञं सर्वपूज्यं वै सत्का मोहप्रदं परं ॥३४॥ यदा स्वधर्मनिष्ठाश्च ब्रा ॥१२३॥
ह्मणा वचनं तदा ॥ तेषां प्राप्यं न संदेहो मान्यथा मोहदं कदा ॥३५॥ गुणयुक्ता विहीनाश्च ब्राह्मणमान

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वैः सह ॥ वंदनीया न संदेहः पूज्याः सर्वत्र संमताः ॥ ३६ ॥ अतो हं ब्राह्मणे न त्वा सर्वान्नमामि वचनं तथा ॥
हितं चैव न द्रष्ट्रिष्यामि नान्यथा गुरुवः कृता ॥ ३७ ॥ ब्र॥ उ० ॥ सुबोधस्य वचः श्रुत्वा विस्मितास्ते महर्षयः
ऊचुस्तं देवपुत्रं वै शृणु धर्मसुखप्रदं ॥ ३८ ॥ देशाचार्य ऊचुः ॥ सुबोध त्वं च बालोसि वदसि योगमुत्त
मं ॥ स्वधर्मादिसमायुक्तं साक्षाद्योगीश्वरो यथा ॥ ३९ ॥ न तपो वेदविद्या या शिक्षिता सा महामते ॥ त
थापि कथमेतत्ते ज्ञानं प्राप्तं वद प्रभो ॥ ४० ॥ सुबोध उवाच ॥ माता गर्भवती मभूद्गता पितुर्गृहे क
दा ॥ तत्रायया महाभागः शुकः सर्वार्थकोविदः ॥ ४१ ॥ तं प्रणम्य स योगीशं प्रल्हादो हर्षसंयुतः ॥ पू
ज्यभोज्य महात्मानं प्रपृच्छ विनयान्वितः ॥ ४२ ॥ प्रल्हाद उ० ॥ व्यासपुत्र महायोगिन् शुक साक्षा
च्छिवः स्वयं ॥ त्वं ज्ञानोसि न संदेहो योगीन्द्राणां गुरोर्गुरुः ॥ ४३ ॥ पूर्वपुण्यबलेनैव प्राप्तं ते दर्शनं मह
त् ॥ अतस्त्वां परिपृच्छामि वद स्व करुणानिधे ॥ ४४ ॥ सर्वमान्यं च सर्वेषां योगशांतिप्रदं भवेत् ॥ नाना

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मनविमोहस्य छेत्स्कं वद विस्तरात् ॥४५॥ सुबोध उवाच ॥ प्रह्लादस्य वचो रम्यं श्रुत्वा योगीन्द्रसत्तमः ॥ जग
द वं महाभागं योगशांतिपरायणं ॥४६॥ शुक उवाच ॥ प्रह्लादत्वं महाभाग सुज्ञोसि योगधारकः ॥ अतस्त्वां
हि विशेषेण वदामि हितकारकं ॥४७॥ सर्वमान्यं तथा राजन् सर्वेभ्यः शांतिदायकं ॥ नानामतेषु सत्यं यत्
थयामि सविस्तरं ॥४८॥ एकदा नैमिषारण्ये समाजग्मुर्महर्षयः ॥ ब्रह्मा उत्स्था महाभाग ब्रह्मयज्ञस्य
कारणात् ॥४९॥ यत्र योगमयी गाथा वर्तते हानवोत्तम ॥ सब्रह्मयज्ञ ईस्कचो वेदे पुर्वे दर्वादिभिः ॥
५०॥ मरिचिः कश्यपश्चैव कण्वो त्रिः पुलहः क्रतुः ॥ विश्वामित्रो महातेजा यज्ञवल्क्यस्तथा रुचिः ॥५१॥
अष्टावक्रो वसिष्ठश्च भारद्वाजः पराशरः ॥ व्यासः परशुरामश्च श्वेतकेतुर्मुद्गलो मुनिः ॥५२॥ अगस्त्यो
हनुमांश्चैव विभीषणश्च राक्षसः ॥ अश्वत्थामा वृषश्चैव गरुत्समदः प्रतापवान् ॥५३॥ मार्कंडेयो मृक
ण्डश्च वक दाल्भ्यस्तथा विभो ॥ नारदः कपिलो रैभ्यः कर्दमश्च महायशाः ॥५४॥ एको द्वितस्त्रितश्चैव

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

देवलोऽगस्तिनस्तथा॥ पुलस्त्यश्च भृगुः सौभरिच्यवनो गौतमो मुनिः॥५५॥ अंगिराश्च दीर्घतमा उतथ्यो
गालवस्तथा॥ दधीचिरष्टावक्रो जीवो जमदग्निर्महामुनिः॥५६॥ वैशंपायन एवं वै शौनकः शुनकः प्र
भो॥ वामदेवः सुमंतुश्च पैलः शाकलको मुनिः॥५७॥ जैमिनिर्धौम्यकाश्यपाश्च सशिष्यास्तत्र तेययुः
अन्ये नानामुनिवरा द्रष्टुकामाययुः किल॥५८॥ दत्तात्रेयश्च दुर्वासा जडभरतो निदाघकः॥ सनात
नः सनंदश्च सनत्कुमार आययुः॥५९॥ ऋभुर्हंसश्च सनकः सदा ध्यानपरोऽपरे॥ अवधूता योगिनश्च
जग्मुर्यज्ञस्य दर्शनात्॥६०॥ इंद्रोऽग्निस्तथा विष्णुः शंकरो भानुरेव च॥ सत्रिकादेवराजाश्च देवा
अन्ये समाययुः॥६१॥ शेषो वासुकिनागश्च कंबलोऽश्वतरस्तथा॥ तक्षकाद्या महाभागा नागा
स्तत्र समाययुः॥६२॥ गंधर्वाश्चाप्सरसश्चैव सिद्धाः साध्यगणास्तथा॥ आदित्या वसवो यक्षा आ
ययुरप्सरोवराः॥६३॥ कर्मनिष्ठास्तपोनिष्ठा ज्ञाननिष्ठाश्च योगिनः॥ नानादेवरताः सर्वे आययु

मो॰
१२५

स्नात्रमानद॥६४॥प्रल्हादब्रह्मयज्ञस्यहर्षनार्थं विशेषतः॥तत्रैव निश्रेयसकाः सर्वमार्गभिवम् १०
जनाः॥६५॥इति श्रीमद्गंगे मोद्गले महापु॰ तृ॰ म॰ ब्रह्मयज्ञवर्णनं नाम षट्चत्वारिंशोध्यायः॥४६॥
श्रीवरदमूर्तिर्जयति॥श्रीशुकउवाच॥तत्र नानाकथांचक्रुः नानामतप्रकाशिनीं॥स्वबुद्ध्या च
विशेषेण मुख्याः प्रल्हाद आदयः॥१॥केचिदाहुर्विधातारं विष्णुं शक्तिं शिवं रविं॥ब्रह्मरूपं गणे
शानं नाना मतपरायणाः॥२॥केचिदन्नं च प्राणं वै मनो विज्ञानकं तथा॥आनंदं सोऽहमेकं केचित्त
न्यां बिंदुकं परे॥३॥बोधमात्मानमेके च सांख्यं कर्मं तथा परे॥सममन्ये रूपं तं आहुर्ब्रह्मपरात्परं
॥४॥स्वसंवेद्यं तथा केचिन्निवृत्तिं शांतिरूपकं॥योगमध्यात्मरूपं तमाहुर्वेदपरायणाः॥५॥असम ॥१२५॥
ससमेके च पूर्णानंदं तथा सुर॥सहजं च परं ब्रह्मवादयुक्ता बभूविरे॥६॥निश्रेयसात्तदैवेशानवं
भूतमनैषिणं॥स्वस्वज्ञानसमायुक्ता वादं चक्रुः पंडिताः॥७॥ततो वादस्य शांत्यर्थं मुद्गलं विष्णु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रव्ययः ॥ सर्वान्समागतांस्तत्र सर्वज्ञः शंकरेरितः ॥ ८ ॥ विमुखा० ॥ वेदागुरुस्वरूपाश्च सर्वेषां नात्र
संशयः ॥ तैर्यत्संपादितं देवा मुनयः सर्व आगताः ॥ ९ ॥ सपद्यं तां विशेषेण ब्रह्मणो निश्चयार्थिनः
॥ सुखं तद्देव सर्वेषां सर्वमान्यं भविष्यति ॥ १० ॥ वेदैः स्वानुभवं गीतं यथा तथ्यं मुनीश्वराः ॥ अतो
वेदैश्च सर्वेषां ज्ञानं संजायते परं ॥ ११ ॥ योगादिभिर्जनाः केचिन्मुनयो देवराक्षसाः ॥ साक्षात्कारं च
न ह्यस्य कुर्वन्ति नात्र संशयः ॥ १२ ॥ तथापि वेदसामान्यं वचस्तेषां न विद्यते ॥ वेदानां न समो विप्रा योग
तः कुत्र दृश्यते ॥ १३ ॥ संपूर्णयोगिनो वेदा अतस्ते गुरवो मताः ॥ तानुत्सृज्यैवं महाभागास्तत्र निःसं २५
शयं भवेत् ॥ १४ ॥ ततो मुनिगणाः सर्वे योगिनो देवनायकाः ॥ साधु साधु समूचुस्ते विष्णुं बुद्धिमतां
वरं ॥ १५ ॥ ततः शंकरमुख्यैस्तैः संस्मृताः कार्यसिद्धये ॥ सांगाः समाययुर्वेदा ॐकारेण समन्वि
ताः ॥ १६ ॥ तान्दृष्ट्वा सहसोत्थाय देवाः सर्षिगणाः परे ॥ प्रणम्य पूजयामासुः कृतांजलिपुटाः

मो०
१२६

पुरः॥१७॥आसनेषु समासीनाः सोंकारा वेदमुख्यकाः॥ ऊचुस्तान् शिवमुख्यान्वै प्रहृष्टमनसो भव
न्॥१८॥वेदा ऊचुः॥ किमर्थं स्मरणं देवा मुनयश्च कृतं जनाः अस्माकं ब्रूत कार्यं न त्व करिष्यामो न सं
शयः॥१९॥वेदानां वचनं श्रुत्वा शिवस्तान् ब्रवीद्वचः॥ विनयेन विशेषज्ञो निश्चयार्थं हितैषिणः॥
२०॥ शिव उवाच॥ ब्रह्मयज्ञः समारब्धो स्माभिः सर्वैर्हि भिक्षुभिः॥ तत्र वादः समायुक्तस्तदंतं न ल
भामहे॥२१॥ अतो भवत्स्मृतिर्वेदाः कृतास्माभिर्न संशयः॥ निश्चयं गुरवो यूयं वदत भेदनाशकं
॥२२॥ योगिनो न भवंतीह भवत्सामान्यकाः क्वदा॥ भवद्वचः प्रमाणेन योगज्ञा विषयमच्युत॥२३॥ शि
वस्य वचनं श्रुत्वा वेदास्तत्र जगुर्वचः॥ देवान्मुनीन्जनान्सर्वान्निरीक्ष्य न असुरेश्वर॥२४॥ वेदा ऊचुः
॥ब्रह्मयज्ञस्य पारं वै गमिष्यामः कथं वयं॥ अक्षरात्मकदेहत्वात्तथापि कथयामहे॥२५॥ न वयं त्व ॥१२६॥
त्क्षणे रूपा ब्रह्मज्ञाः किंचिदप्यहो॥ योगमार्गबलेनैव वदिष्यामो यथातथं॥२६॥ प्रत्येकं निश्चयं दे

वाः शृणुत ब्रह्म धारणं ॥ येन संशय संहीनाः गमिष्यथ परां गतिं ॥ २७ ॥ ऋभ्वेहतुवाच ॥ ब्रह्म नानाविधं
प्रोक्तं मया योगबलेन च ॥ प्रज्ञानादि महावाक्यैर्लक्षणो योगो विशिष्यते ॥ २८ ॥ सर्वब्रह्मसु योगस्य स्था
नं योगात्मकं भवेत् ॥ योगे ब्रह्माणि सर्वाणि तदाकाराणि वर्णितं ॥ २९ ॥ न योगात्परमं ब्रह्म योगशां
त्या प्रलभ्यते ॥ ब्रह्मणस्य निरेकोयं मया प्रोक्तो गणेश्वरः ॥ ३० ॥ ब्रह्मणां सकलानां स पानयाल
यिवग्रनः ॥ तं भज त्वं सुरश्रेष्ठा मुनयो भक्तिसंयुताः ॥ ३१ ॥ ब्रह्मभूता जनाः सर्वे भवंति तेन निश्चि
तं ॥ एवमुक्त्वा बहूत्व स्तुतुष्णीं भावधरो भवत् ॥ ३२ ॥ ततो यज्ञुः स्वयं साक्षादुवाच सर्वसंसदि ॥
स्वानुभावात्मकं तत्र वचनं ब्रह्मदायकं ॥ ३३ ॥ यज्ञुरुवाच ॥ नानाविधं मया ब्रह्म वर्णितं योगसे
वया ॥ महावाक्यैश्च सर्वत्र ताः क्रमार्थं नात्र संशयः ॥ ३४ ॥ तत्र योगस्वरूपाख्यमां से ब्रह्म विशिष्य
ते ॥ सर्वब्रह्मसु योगेन योगस्तेन प्रकथ्यते ॥ ३५ ॥ तदेव गणराजश्च भक्तैः संप्रार्थितः पुरा ॥ योगप्रा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वार्थमस्यंतंतेनसाकारकोभवेत्॥३६॥गणाःसमूहरूपाख्यःसमूहाब्रह्मरूपिणः॥तेषांस्वामीनसंदेह
स्तेभजध्वंविधानतः॥३७॥अन्नानांसकलानांवैसदेकानेकरूपिणां॥समूहब्रह्मज्ञानत्वमन्नात्मक
मितिश्रुतिः॥३८॥एवंनानाविधानिचब्रह्माणिदेवनर्षयः॥ज्ञातव्यानिविचारेणगणरूपाणिनि
श्चितं॥३९॥अतोगणेशभक्त्यावैसकलंसुलभंभवेत्॥ब्रह्मभूतपरःप्रोक्तोमयायोगेनयोगपः
॥४०॥इत्युक्त्वाविररामाथपप्रच्छुर्योगविदांवरः॥ततःसामन्तवाचाथब्रह्मनिर्णयकारणात्॥४१॥
सामन्तउवाच॥योगसेवनसामर्थ्यात्समर्थोहंचवर्णने॥देवेशाब्रह्मणःकिंचिच्छृणुतमुनयोवचः॥
४२॥नानाब्रह्माणिचोक्तानिमहावाक्यादिभिर्मया॥पात्रभेदार्थमस्यंतंज्ञातव्यंयोगसेवया॥४३
ततश्शांतिपरंब्रह्मयोगाख्यंनात्रसंशयः॥ब्रह्मणांतत्रयोगश्चभवतितेनयोगकः॥४४॥नास्ति ॥१९७॥
योगात्परंब्रह्मशांतिमार्गेणलभ्यते॥तदेवमुनयोदेवागणेशोनात्रसंशयः॥४५॥मनोवाणीम

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यंदेवापयन्नम्या प्रकीर्तितं ॥ गकाराक्षरसंभूतं ज्ञानख्यं विबुधैः सदा ॥ ४६ ॥ मनोवाणीविहीनं यद्द
एयति विविधं तथा ॥ णकाराक्षरगं सर्वं निश्चितं योगसेवया ॥ ४७ ॥ तयोः स्वामी गणेशानो योगाकारः
प्रकीर्तितः ॥ तं भजध्वं विशेषेण ब्रह्मभूत परात्परं ॥ ४८ ॥ नानाभावेन युक्तास्तं भजंति तद्दितिसः ॥
एवमुक्त्वा महायोगी विरराम ससामकः ॥ ४९ ॥ ततोथर्वा महायोगी जगाद सकलां स्वदा ॥ ब्रह्मयज्ञ
स्य वेचासौ प्रह्लाद शृणु तद्वचः ॥ ५० ॥ अथर्वोवाच ॥ आत्माहमिति वाक्याद्यैर्ब्रह्म नानाविधं मया ॥
संपादितं च योगेन तदेवोपाधिसंयुतः ॥ ५१ ॥ योगाख्यं परमं ब्रह्म योगेन तत्प्रलभ्यते ॥ संयोगायोग
हीनेन योगो ब्रह्मसुनिष्ठितः ॥ ५२ ॥ शांतिस्तत्र समाख्याता योगेयोगविदांवराः ॥ स एव गणनाथस्तु स
र्वशांतिप्रदो भवेत् ॥ ५३ ॥ एक एव गणेशानो जगतां ब्रह्मणां स्वयं ॥ ईशः समूहरूपाद्यां योगरूपस्त
तः स्मृतः ॥ ५४ ॥ सर्वेषामाहिरूपोपं योगाकारप्रभावतः ॥ मध्ये नानाविधः स्वांशैर्जगत्सु ब्रह्मसु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

+ब्रह्मप्रदं तेन ब्रह्मज्ञाः सर्वसंमताः ॥६१॥ योगासारं न विद्येत ब्रह्म सर्वत्र संमतं ॥ जगत्सु ब्रह्मसु

मो० १२८ प्रभुः ॥५५॥ अनेनत्वयं तथा तिष्ठते नादिपूजको भवन्न सर्वपूज्यश्च देवेशा मुनयो निश्चयार्थिनः ॥५६॥
यआदिः सो नरूपस्तु भवति सर्वसंमतः ॥ मध्ये माया विहारेण भेदाभेद प्रभुर्नो भवत् ॥५७॥ अतस्त्वं योग
रूपाख्यं भजध्वं योगसेवया ॥ भविष्यथ ब्रह्मभूता वैद्य यज्ञस्य पारगाः ॥५८॥ एवमुक्त्वा महायोगी वि
रराम महामते ॥ अथ वा सर्वयोगज्ञस्तानोंकारो ब्रवीद्वचः ॥५९॥ ॐकार उ० ॥ चतुर्वेदप्रभुरहं मया
योगस्य सेवया ॥ ब्रह्मसाक्षात्कृतं देवास्तेन योगी मतो भवे ॥६०॥ मयोपदेशिता वेदाः साधयामासुरत्र
ह्मो योगं ब्रह्मशाश्वतं ॥६१॥ तदेव गणराजो वै निश्चितो योगिभिः सदा ॥ संयोगायोगाभावेन क्रीड
ति योगरूपधृक् ॥६२॥ सिद्धिर्भ्रांतिमयी माया बुद्धिर्भ्रांतिधरा मता ॥ तयोः स्वामि गणेशानो माया
भ्यां खेलको विभुः ॥६३॥ भुक्तेः सिद्धिः तथा मुक्तेः सिद्धिर्ब्रह्मप्रदायिनी ॥ चित्तं पंचविधं बुद्धिस्त ॥१२८॥
यो योगेन लभ्यते ॥६४॥ स्वसंवेद्यात्मकं ब्रह्म देवेषु कथितं पुरा ॥ सर्वसंयोगरूपाख्यं तत्रापि दृश्यते

स्वयं ॥६६॥ तेन स्नानं दृवासीत्व माया युक्तः प्र कीर्तितः ॥ अयोगे दर्शनं तस्य जायते न कदाचन ॥६७॥ नि
र्मायिक स्ततः प्रोक्त स्तयो योगिन लभ्यते ॥ गकारश्चैव संयोगो णकारो योग उच्यते ॥६८॥ तेन नाम्ना समा
ख्यातो गणेशो वेदवादिभिः ॥ तं भजध्वं विशेषेण ब्रह्मभूतस्य कारणात् ॥६९॥ ब्रह्मभूता द्विजा देवा भवि
ष्यथ न संशयः ॥ एवमुक्त्वा तदोंकार स्तूष्णीमासीन्महामते ॥७०॥ श्रीगणेशार्पय ॥७१॥ इति श्रीमद्गां
शेमौद्गले॰ च॰ म॰ वेदनिर्णयो नाम सप्तचत्वारिंशोऽध्यायः ॥४७॥ शुक उवाच ॥ सोंकार वेदमुख्या
नां वचनं हितकारकं ॥ शुश्राव सर्षिगणो देवानां गाद योज हर्षितः ॥१॥ सत्क्रा स्तस्य मतं सर्वे तान्प्रणम
प्रपूज्य वै ॥ ॐकारादीन्महाभागा ऊचुः प्रांजलयो वचः ॥२॥ देवादय ऊचुः ॥ ॐकार सहिता वेदा भ
वद्भिः कथितं वचः ॥ तदेव सर्वमान्यं वै ब्रह्मभूतप्रदं भवेत् ॥३॥ सर्वे मां गुरवः प्रोक्ता वेदा स्तैः कथितं
भवेत् ॥ तदेव करणीयं यद्दतिदं सर्वसंमतं ॥४॥ वेदाधार विहीनं यत्त्याज्यं सर्वैर्न संशयः ॥ नो चेन्नर

मो॰ १२९ कृत्वा भूत्वा यातनां लभते नरः॥५॥ब्रह्मयज्ञस्य पारं वै भवंतो देवनायकैः॥मुनिभिर्ज्ञानिसंघैश्च गता भवं रा॰
निनिश्रितं॥६॥एवमुक्त्वा महाभागा देवाद्यो विशेषतः॥तुष्टुवुर्वेदमुख्यास्ते प्रह्लादहर्षसंयुताः॥७॥
पूजितास्तैः स्तुता वेदाः सौंकारा देवनायक॥अंतर्दधुस्ततः सर्वे हृष्टाः स्थानं ययुः स्वकं॥८॥एवं सर्वैः
पुरा साधो ब्रह्मयज्ञः कृतो भवेत्॥तेन संज्ञाप्य सीनास्तो भजंतं गणनायकं॥९॥एतत्ते कथितं पूर्णयो
गशांतिप्रदं परं॥सर्वमान्यं विशेषेण भजंतं गणनायकं॥१०॥सुबोध उवाच॥एवमुक्त्वा महायोगी
शुकश्चांतर्हितो भवत्॥प्रह्लादो भक्तिसंयुक्तो भजते गणनायकं॥११॥पूर्वपुण्यैर्बले नैव स्मृतिर्मे
त्वत्प्रसंस्थिता॥जनितो हं ततो विप्रा भजामि गणनायकं॥१२॥एतत्सर्वं मया प्रोक्तं, यत्पृष्टं गुरुमुख्य
काः॥अतो हं मोहहरां विद्यां मा वदत तदा पुनाः॥१४॥सूत उवाच॥सुबोधस्य वचः श्रुत्वा ब्राह्मणा ॥१२९॥
हर्षसंयुताः॥योगनिपुणमूचुस्तं भावज्ञा भावसिद्धये॥१५॥विप्रा ऊचुः॥सुबोध यत्त्वया प्रोक्तं
मानुषदरसंस्थेन संभुक्तं स कृतं नतः॥मया ष्टुतं विशेषेण गतेदेवयोगदां नकं॥१६॥४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्तथा न तदन्यथा ॥ तथापि शृणु वत्स त्वं हितकारक मुनमं ॥१६॥ पितामहो महाभाग दुर्बुद्धिस्तो महासु
रः ॥ गणेशेन हतो रोषाद्देवपक्षप्रधारिणा ॥१७॥ तं हृष्ट्वा गणराजानं पितानेपित्रवत्सल ॥ पितृद्रुहं
न तत्त्वं प्रसन्नविघ्नेशमारराध ॥१८॥ नो चेत्तां ते पितापुत्र हनिष्यति न संशयः ॥ तस्माद्गृहमसंतंमाकु दा ३
रुष्व महामते ॥१९॥ असुराणां कुले पश्यन्निनत्वं हितावहः ॥ स्वकुलस्थस्य मार्गस्य सेवनं कुरु
सर्वदा ॥२०॥ तेषां वचनमाकर्ण्य सुबोधो रक्तलोचनः ॥ जगाद तान् द्विजांस्तान्वचनं धर्मसंयुतं ॥
२१॥ सुबोध उवाच ॥ सर्वत्र योगरूपेण गणेशास्तिष्ठति द्विजाः ॥ स्वस्वधर्मनियंतासौ नानाक्रीडाप
रायणः ॥२२॥ स्वर्गे देवा नराः पृथ्व्यां पाताले तेन देसपाः ॥ स्थापितां स्वस्वमार्गेषु स्थातव्यं तै
र्हितेशुभिः ॥२३॥ पितामहश्च मे ब्रह्मस्त्रिलोकराज्यमुत्कटं ॥ त्वकारधर्महीनेन तस्माच्चैन हतो
बलात् ॥२४॥ पितामे पितथा विप्रा धर्महीनतया स्थितः ॥ तं हनिष्यति वेगेन गणेशो नात्र संश

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो॰
१२०

यः॥२५॥ अतः किं गणराजेन विपरीतं कृतं द्विजाः॥ स्वधर्मस्थप्रियेणैव वदन्तमां विशेषं^{तः}॥२६॥ स २॰
र्वेषां हितकर्त्तासौ विघ्नराजो न संशयः॥ त्वं मे जिष्णामि यत्नेन सत्यक्त्वा स्वं पितरं खलु॥२७॥ गणेशं भज
मानं मां वधिष्यति यदा खलः॥ लप्स्ये न मरणं श्रेष्ठं ब्रह्मभूतप्रदं भवेत्॥२८॥ मया के कुपिते किं वै गु
रुं सत्यक्त्वा मनीषिणः॥ तिष्ठन्ति ब्राह्मणाः सर्वे मां प्रवदन्तु सांप्रतं॥२९॥ बुद्धिपतेर्गणेशस्य सत्यास
र्वत्र वर्त्तते॥ सिद्धिपतेर्न संदेहः किं करिष्यति मां पिता॥३०॥ स्वधर्मः सर्वभूतानां धर्मार्थकाममु
क्तये॥ ब्रह्मभूतार्थमस्यं तं गणेशभजनात्मकः॥३१॥ एतादृशं स्वधर्मं किं सत्यक्त्वा विषयलंपटः॥ भ
विष्याम्यसुराधीनो ब्राह्मणः कुलपांसवः॥३२॥ न ब्राह्मणा भवन्तोपि विषयेषु परायणाः॥ स ॥१२०॥
त्यक्त्वा ब्रह्मस्थिता अन्ये दैत्याधीना न संशयः॥३३॥ गणेशभजने सक्ता ब्रह्मभूतपरायणाः॥ ब्रा
ह्मणास्ते मताः शास्त्रे किं मा वदन्त बालिशाः॥३४॥ श्रीदक्ष उवाच शुक्रशिष्यान्प्रजानाथ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवमुक्त्वा महामतिः॥ सुबोधो गणनाथस्य भजनेन तत्परोऽभवत्॥ ३५॥ नमो गणेशाय नमो महात्मने
नमः परेशाय परात्परात्मने॥ अनादिमध्यान्तमयाय दुंढयेन मो नमो विघ्नपते सुशान्तिद॥ ३६॥ एवं
विचरमाणं तं शालाकाव्यस्य शिष्यकाः॥ भयभीता विशेषेण ज्ञानारिं तेऽप्युः प्रभो॥ ३७॥ इति श्रीमद्गां
शे मौद्गले ८ ख० मं० शुक्र शिष्य सुबोधसंवादो नामाष्टचत्वारिंशोऽध्यायः॥ ४८॥ ॥श्री दक्ष उवाच॥ काव्य
शिष्यागतास्तत्र यत्र दैत्याधिपोऽभवत्॥ सभासनस्थं मूचुस्तं दक्ष भयसमन्विताः॥ १॥ शुक्र शिष्या
ऊचुः॥ ज्ञानारे शृणु वाक्यं नो दारुणं विपरीतगं॥ पुत्रस्ते भूत् महाराज कोऽस्मानुपेक्षति सर्वदा॥ २॥ अ
स्माभिः कथितं सर्वमुल्लंघ्य जाति दूषणं॥ करोति स्वमतेनाथ मन्यान् संबोधयन् तथा॥ ३॥ पितृहंतार
मयं तं सदा स्मरति भक्तितः॥ निरस्तो सम महाराज अस्मान्स्त्वां नात्र संशयः॥ ४॥ अतस्त्वां कथितुं याताः
शिक्षयस्व स्वपुत्रकं॥ न वयं शिक्षितुं शक्ता दुर्विनीतं महामते॥ ५॥ श्री दक्ष उवाच॥ तेषां वचनमाक

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गो० एवं स्तुभितो दैत्यनायकः ॥ प्रेषयामास दूतं स पुत्रमानेतुमंतिके ॥ ६ ॥ दूतेनागतमेवं स पुत्रं दृष्ट्वा महासु ग०
१३१ रः ॥ उवाच स्तवंतं तं प्रणामं क्रोधसंयुतः ॥ ७ ॥ ज्ञानारिरुवाच ॥ किं तिरस्कृत्य रे वत्स गुरून् स्मरसि नद्वद्
॥ दितं ते हृदये किंचवर्त्तिकुलपांसन ॥ ८ ॥ पितुर्वचनमाकर्ण्य क्रोधयुक्तः सुबोधकः ॥ उवाच पित
रं भ्रांतं मायया गणपस्य च ॥ ९ ॥ सुबोध उवाच ॥ सर्वेषां कुलदेवं च सर्वेषां हितकारकं ॥ भुक्तिमुक्ति
प्रदं तात भजामि गणनायकं ॥ १० ॥ ब्रह्मविष्ण्वादिभिर्देवैः कश्यपादिमुनीश्वरैः ॥ पूजितं कुलवृद्ध्य
र्थं योगशांत्यर्थमादरात् ॥ १२ ॥ अतोऽहं गणनाथं वै भजामि सर्वभावतः ॥ तमनादृत्य दैत्येश न सिद्धिं
लभते पुमान् ॥ १३ ॥ तस्य तद्वचनं श्रुत्वा क्रोधयुक्तो महासुरः ॥ जगाद तं धर्मराज मुखादनल्पमुद्गम
न् ॥ १४ ॥ ज्ञानारिरु० ॥ अस्माकं शत्रवो देवा दैत्यानां नात्र संशयः ॥ सुरासुराश्च वेदेषु प्रोक्ताः पक्ष ॥१३१॥
सुहृन्मते ॥ १५ ॥ तत्राप्ययं पितुर्हंता मम भजसि तं मुधा ॥ बालभावे मया ज्ञातं चेष्टितं ते रिपुश्रितं ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥१६॥ बालं महान्तं त्वां दुष्ट हन्तवान् रूपया पर॥ अधुना तादृशं मत्वा न मुंचामि कदाचन॥१७॥ सजशत्रुं
महामुखवनीत्वेद्धन्म्यधुना किल॥ एवमुक्त्वा खड्गहस्तोऽद्रुद्राव स्वसुतं नृप॥१८॥ ततस्तं दैत्यराजं स उ
वाच तनयो वचः॥ किं धर्षयसि मां तात भ्रान्तिभावेन मोहित॥१९॥ सर्वसत्ताधरः आत्को वेदेषु गण
नायकः॥ तस्य सत्तां परित्यज्य किं हंसि मां त्वमेव च॥२०॥ सुरासुरमयः साक्षाद्गणेशो नात्र संशयः
उद्धृतं हंति वेगेन नानारूपधरः प्रभुः॥२१॥ ब्रुवंतं स्वसुतं दृष्ट्वा भयहीनं युधिष्ठिर॥ क्रोधयुक्तः स्वयं त
त्र संस्थितो दैत्यनायकः॥२२॥ दूतानाज्ञापयामास शस्त्रास्त्रैः स्वसुतस्य सः॥ हे सगणाव धार्यंत
क्रोपयुक्ता बभूविरे॥२३॥ नानानोदयुताः सर्वे नग्नशस्त्रधरायपुः॥ हंतुं तं तानपोदृष्ट्वा सुबोधो नि
र्भयो बभौ॥२४॥ गणेशं भजनेसक्तो वभूवनचचालह॥ देहप्रारब्धभावेन भवतु मे गजानन॥२५॥
विघ्नेशाहेरंबजया [illegible] खिलेशास्वानंदवासिनूजपवक्रतुंड॥ नाथोसि सर्वगजगत्सुदुंदे लंबोदरब्रह्म

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० ११२ सुतेनमोवै॥२६॥इत्यादिविविधैर्वाक्यैर्गणेशमभजन्सुतः॥तंतथाक्रोपसंयुक्ताजघ्नुर्दैत्यामहाबलाः ९०
॥२७॥नानाशस्त्रनिपातैस्तेशस्त्रैःसर्वत्रयुधिष्ठिर॥गणेशस्तस्यदेहस्थोनिष्फलांस्तांश्चकारह॥२८॥
क्रोधानलेनसर्वान्सदाहयामासविघ्नपः॥ततःपलायनंचक्रुर्दैत्याःप्राणपरीप्सया॥२९॥तदृद
ष्ट्वापरमाश्चर्यंसानारिःक्रोधमूर्छितः॥श्रेष्ठानाज्ञापयामासवधायस्वसुतस्यवै॥३०॥चतुरंगव
लैर्युक्तादैत्येशास्तंसमाययुः॥अमोघास्त्रैःसुवोधंतंजघ्नुःपरमदारुणाः॥३१॥सोपिगणेशभक्तिं
तांचकारनिर्भयोहृदं॥जयदेवेशविघ्नेशमहोदरनमोस्तुते॥३२॥तस्यदेहान्महानग्निःशस्त्रघात
जजघ्नतः॥समुत्पन्नःप्रजज्वालदैत्येशान्क्षणमात्रतः॥३३॥मेघास्त्राणिससर्जुस्तेतैर्नशांतो ॥१३२॥
बभूवह॥हाहाहसकलांस्तत्रप्रलयाग्निसमश्चतान्॥३४॥मृताःसर्वेसुराणांवैनापकारास्तत्रभूमि
प॥सानारिःपरमाश्चर्ययुक्तोभूत्खेदसंयुतः॥३५॥प्रधानैःसविचार्यैवपुत्रंतत्याजतत्क्षणात्॥

×ततस्तेन सुबोधेन देसपुत्रा युधिष्ठिर ॥ शिक्षिताः प्रत्ययं दृष्ट्वा तथा गणप माभजन् ॥४०॥ २४

पुत्रं तपसि तिष्ठंतं ज्ञात्वा क्रोधं नियम्य च ॥३६॥ मेधावी च परं पुत्र आगमिष्यति स्वगृहे ॥ तदा तेन
समायुक्ता हनिष्यामः सुबोधकं ॥३७॥ एवं निश्चित संकल्पाः स्थितास्ते देस नायकाः ॥ ज्ञानारिः स
तथा चक्रे हृदयेन विरूपता ॥३८॥ सुबोधो गणपं तत्रा भजद नन्यमानसः ॥ निर्भयो दानवान् सर्वान् स्त्री
णीकृत्य विशेषतः ॥३९॥ सत्यं गणेश माहात्म्यं महद् त्र नान्यत्र संशयः ॥ पंचत्वं प्रापे देसभूपाला मृताः कश्यप
दृष्ट्वा हो ॥४१॥ एवं क्रियाः सर्वत्र बाला विप्रश्रमा द्रतान् ॥ अभजन्सर्वभावेन तिरस्कृत्य गुरोः सुतान् ॥४२॥
यत्र तत्र गणेशस्य कीर्तनमर्चनादिकं ॥ अकुर्वन् देसपुत्रास्ते सुबोधेन समन्विताः ॥४३॥ नमो नमो वि
घ्नपते गणेश सर्वात्म संवेद्य पुरे निवासिन् ॥ अनादि मध्यांत विहीन काय स्वशांति दात्रे जय सर्वपू
ज्य ॥४४॥ एवं दृष्ट्वा स सर्वत्र ज्ञानारिः क्रोध मारधे ॥ सहनेन समर्थोभून्मलिंचित्र बधायवे ॥४५॥
हनिष्यामि सुतं दृष्ट्वा स्वयं युक्त प्रभावतः ॥ न मे मृत्युर्भवेन्नून मिति व्यवसितो भवत् ॥४६॥ इति श्रीमद्गो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ०
१३३

मौद्गले०पु०तृ०म०सुबोधभक्तिवर्णनंनामैकोनपंचाशत्तमोध्यायः॥४९॥श्रीकृष्णउवाच॥अधुना तृ०
शृणुधर्मज्ञदेवादीनांवनेषुवै॥यज्ञानंतत्सवरस्यामिषण्णानंदस्यचेष्टितं॥१॥विष्णुमुख्यान्सुरानाह
पूर्णानंदःप्रतापवान्॥किमर्थंदुःखसंयुक्ताभवंतःसर्वजंतुभिः॥२॥ज्ञानारिणावृतंसर्वंजगत्स्थाव
रजंगमं॥दुःखयुक्तंविशेषेणतंहनिष्यामिनिश्चितं॥३॥मयिपुत्रत्वमापन्नेदुर्लभंकिंचविद्यते
॥तस्माद्देवगणैःस्थानंगच्छवैकुंठमादरात्॥४॥ज्ञानारिःपुत्रनाशार्थंयततेचाधुनाप्रभो॥तस्य
पुत्रोमहाभक्तोमदीयोनात्रसंशयः॥५॥भक्तरक्षार्थमेवाहंगमिष्याम्यधुनास्वयं॥तंहत्वासु
खमेष्यामिस्वभक्तद्वेषिणंखलं॥६॥चराचरमयात्तस्यभयंनास्तिकदाचन॥चराचरमयःसर्वत्रैगु
ण्येनात्रसंशयः॥७॥अतोद्वंद्वविहीनेनरूपेणातंमहासुरं॥हनिष्यामिस्वभक्तार्थंपश्यमेवैकुंठ ॥१३३॥
हृत्तं॥८॥एतस्मिन्नंतरेचैवज्ञानारिःखड्गमादधेसुबोधंहंतुमत्यंतंक्रोधयुक्तोयुधिष्ठिर॥९॥ज्ञाना

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रींता दृष्ट्वा स्तुवो धो भक्तिसंयुतः ॥ गणेशस्य जगाकृ पितच्छृणुष्व युधिष्ठिर ॥१०॥ सुबोध उवाच ॥
अहंकारेण संयुक्तस्तातस्ते मायया भृशं ॥ नत्वा नास्तिगतो ज्ञानं चित्ते संस्थितमेव ते ॥११॥ किंनामगणिः
सर्वेषु कथितो वेदवादिभिः ॥ त्वं गच्छ शरणं तात नो चेत्त्वं वै मरिष्यसि ॥१२॥ न ते भयस्य भावेन प्रजा
मि विघ्ननायकं ॥ किमर्थं श्रमसे मुर्खं सत्तावारं न पश्यसि ॥१३॥ इति पुत्रं ब्रुवंतं स जघान रोषतो दृ
ढं ॥ खड्गेन निशितधारेण स खड्गो निष्फलोभवत् ॥१४॥ ततो नानास्त्रवर्षैस्तं ववर्ष हि सनायकः
तानि निष्फलरूपाणि बभूवुश्च युधिष्ठिर ॥१५॥ अन्यस्त्राणि निशस्त्राणि निष्फलानि महासुरः ॥
वीक्ष्य विस्मितचित्तोसौ मल्लयुद्धे यतोऽभवत् ॥१६॥ पुत्रं पादे शिलायां स संगृह्यास्फालयत्तदा ॥
तावत्स्वयं पपातैव मूर्छितस्ताडितो भृशं ॥१७॥ अहत्परस्य भावेन हतो विघ्नविनाशिना ॥ पुनः सं
ज्ञां समासाद्य कोपयुक्तस्तु दुर्मतिः ॥१८॥ गणेशभजने सक्तं वीक्ष्य विस्मितमानसः ॥ विचारं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो०
१२४

हृदये सोपि चकार परमाद्भुतं ॥१९॥ अहो मां कोऽज घानैव न पश्यामि महारिपुं ॥ केन मार्गेण मे पुत्रं हन्ति दे०
ष्यामि कुलांतकं ॥२०॥ पुत्रस्य मरणार्थाय पतता विविधं सदा ॥ तदर्थं रिपुनाथाश्च सुहृद्भिरभवन्मृतां ॥
२१॥ अहं किं वा मरिष्यामि हनिष्यामि सुतं तु वा ॥ अधुना किं मया कार्यं मयं व्यवसितो भवतु ॥२२॥ तत
स्तेन वधार्थाय प्राप्तं ह्यानं विशेषतः ॥ पुत्ररक्षाकरं चाद्यैव हन्मि पश्चात्सुतं खलं ॥२३॥ मृतो रक्षाकर
स्तस्य रक्षिता न भविष्यति ॥ पुत्रस्य तेन मृत्युं मे गमिष्यति सुतोऽधुना ॥२४॥ एवं निश्चित्य संकल्प्योऽज
गास्कोधसंयुतः ॥ पुत्रं सुबोधनामानं मोहेन मोहितो सुरः ॥२५॥ सुबोधनो विशेषेण रक्षिता कुत्र वर्त
तेति ॥ तमानय महादुष्टं हनिष्याम्यधुनाथवै ॥२६॥ ततस्तं मोहितं प्राह सुबोधः करुणायुतः ॥ ता ॥१२४॥
त पश्य हरिस्थं तं चित्तवृत्तिप्रचालकं ॥२७॥ वैरभावं परित्यज्य तथाहंकारमद्य वै ॥ शरणं गच्छ विघ्ने
शं त्वं त्यमृतो भविष्यसि ॥२८॥ सर्वत्र संस्थितं पश्य स्वामिनं मे गजाननं ॥ नं हं तु मुग्ध नस्त्वं वै मरिष्य

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्मिन्संशयः ॥२९॥ ततस्तं प्रत्युवाचेदं ज्ञानारिर्वचनं नृप ॥ दर्शयिष्ये महाभाग तं मजिघ्रामि निश्चितं ॥
३०॥ एवं कपटभावेन सुबोधं स गजाननः ॥ सुबोधस्तं गणेशानं सस्मार पितृकारणात् ॥३१॥ ततस्तं
मूषकारूढो विष्णुपुत्रः समाययौ ॥ तमन्वयुर्द्विजास्ते वामयभीता युधिष्ठिर ॥३२॥ अकारोगुप्तरूपे
ण मुनयो देवदानवाः ॥ संस्थिता अभवंस्तत्र पश्यंतः कौतुकं प्रभोः ॥३३॥ सुबोधस्य समीपे तं संस्थि
तं गणनायकं ॥ पश्यन्क्रूरं महादुष्टो ज्ञानारिर्हर्षितोऽभवत् ॥३४॥ सुबोधस्तं प्रणम्यादौ संस्तुत्वा च वि
विधैः स्तवैः ॥ उवाच पितरं योगी पश्यतात गजाननं ॥३५॥ सुबोधस्य वचः श्रुत्वा क्रोधयुक्तो महा
सुरः ॥ अमोघं सर्वसंहारकारकं शस्त्रमाददे ॥३६॥ एतस्मिन्नंतरे तत्र पूर्णानंदो हृदि स्थितः ॥ जी
वभावं स देहस्य स्वकर्षयामास भूमिप ॥३७॥ ततः स पतितो भूमौ गतचैतन्यमंजसा ॥ हाहाकारं प्र
चक्रुस्ते दैत्याः पातालमाययुः ॥३८॥ ततस्ते देवविप्राद्यानभःस्थाः सहस्रागताः ॥ प्रणम्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ॰ तुष्टुवुस्तं वै पूर्णानंदं गणेश्वरं ॥४९॥ स्तुवन्तौ पश्यतां भूपसुबोधं गतस्य विघ्नपः ॥ अंतर्द्धानं च कारा रा॰
१२२ पि सर्वे रवि—आह गाम बत ॥५०॥ लक्ष्मीनारायणश्चैव मूर्छितो धरणीतले ॥ पेततुर्दुःखसंयुक्तौ पूर्ण
नंदवियोगतः ॥५१॥ द्विमुहूर्तात्प्रबुद्धौ तौ ततस्तापो हृदि प्रभुः ॥ प्रकटो भूद्वा चाथ मूर्तो मां भजतं यु
वां ॥५२॥ न वियोगो भवत्तानो पश्यतं बुद्धिचालकं ॥ एवमुक्त्वांतर्दधे सौ हृदिस्थो गणनायकः ॥५३॥
तावस्तौ दुःखसंयुक्तौ च क्रतुः परमादृतौ ॥ लक्ष्मीनारायणौ राजन् भक्त्या प्रभजने रतौ ॥५४॥ एवं सर्व
प्रदाना वै महोदरः प्रतापवान् ॥ इह नाचि ब्रह्मभूतौ सौ ब्रह्मभूतप्रहोमतः ॥५५॥ शिवविष्ण्वादिभिर्देवैः
सेवितो भक्तिभावतः ॥ मुनिभिर्योगिभिर्नानाजंतुभिन्नत्रिसंशयः ॥५६॥ तं भजस्व महीपाल विघ्नेशी ॥१२५॥
तो भविष्यसि ॥ स्वधर्मस्थो महाभाग सांनिध्यागमवाप्स्यसि ॥५७॥ मुद्गल उवाच ॥ एवं नारायणेनैं
सत्रुवंतं धर्मपालकः ॥ युधिष्ठिरउवाचाथ प्रेमयुक्तो महामते ॥५८॥ युधिष्ठिरउवाच ॥ दक्षस्त्व

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

महाप्राज्ञ कथां त्वत्प्रसादायिनी ॥ सर्वकामप्रदां पूर्णां वदस्सि नात्र संशयः ॥ ४९ ॥ त्वदीयसंगयोगेन मया
ज्ञातो गजाननः ॥ वदनस्य च मंत्रं मे सन्निकाय सवांधवे ॥ ५० ॥ स तस्मै देवकीपुत्रो ददौ मंत्रं षडक्षरं ॥
धौम्यमुखेन देवेश तथा सर्वेभ्य आदरात् ॥ ५१ ॥ पांडवा द्रौपदीयुक्तास्तेन मंत्रेण विघ्नपं ॥ अभजन् भ
क्तिसंयुक्ताश्चतुर्थिव्रतकारकाः ॥ ५२ ॥ ततो विघ्नविहीनास्ते सूर्यप्राप्य यथेप्सितं ॥ स्थालिस्थमन्न
मसंतं पोषयामासुरग्रजात् ॥ ५३ ॥ वनदुःखविहीनाश्च भ्रमंतस्ते समाययुः ॥ व्यासेन वासुदेवेन युक्ता
ताः स्वानंदके पुरे ॥ ५४ ॥ तत्रैव समये ज्ञात्वा पुत्रं ज्ञातुमभक्तिसंयुतां ॥ पांडवेशं समास्थाप्य श्राद्धं चक्रुः पितु
स्ततः ॥ ५५ ॥ तत्र पिंडप्रदानेन पांडुः स्वर्गस्थमादरात् ॥ नानासुहृद्गणैर्युक्तः समानेतुं प्ययुर्गणाः ॥
५६ ॥ गाणेशेन विमानेन स्वानंदे ब्रह्मरूपिणं ॥ चक्रुर्दक्ष महाभाग महिम्ना क्षेत्रजेन ते ॥ ५७ ॥ गुप्तरूपे
ण वर्षं ते निर्विघ्ना अवसंस्ततः ॥ पश्चात् प्रकटमास्थाय पांडवास्त्रिकावभुः ॥ ५८ ॥ दृष्ट्वा दुर्योधनं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० वीरः ससैन्यैकर्णसंयुतं॥ राज्यं प्राप्याभजत्सोतं गणेशं सर्वनायकं॥५९॥ एवं युधिष्ठिरेणैवाराधितः स रु०
१३६ महोदरः मोहशून्यस्वभावेन योगिनाशांतिधारिणा॥६०॥ पूर्णामिंदावनारथ्य महोदरात्मकः स्मृताः॥ ए
वं नानावतारैः स कुरुते क्रीडनं स्वयं॥६१॥ तेषांच रित्रकं पुण्यं कथितुं न प्रशक्यते॥ वर्षाणामयुतैर्दक्ष
मया केनापि निश्चितं॥६२॥ इदं युधिष्ठिरस्यैव चरितं पापनाशनं॥ शृण्वते पठते वापि तस्मै सर्वार्थदं
भवेत्॥६३॥ इति श्रीमदांत्ये मौद्गले ऋ० ख० म० युधिष्ठिरचरित्रं नाम पंचाशत्तमोध्यायः॥५०॥ मुद्गल
उवाच॥ महोदरस्य क्षेत्रं यद्दक्षिणस्यां दिशि स्थितं॥ देवैश्च मुनिभिस्तत्र स्थापितो गणनायकः
॥१॥ दशयोजनविस्तारः तस्य क्षेत्रस्य मानदः॥ चतुरस्रं च तन्मध्ये महोदरः स्थितोभवत्॥२॥ स्व ॥१३६॥
स्वखंडेषु सर्वत्र द्वीपेषु मुनिभिः पुरा॥ स्थापितो दक्षिणस्यां स दिशि विघ्नमयः प्रभुः॥३॥ तत्र देवाद
यः सर्वे ऋषयो योगिनस्तथा॥ तीर्थानि क्षेत्रमुख्यानि संस्थितानि भवंति च॥४॥ समुद्रे स्नानकर्ता

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रः स्वस्वतीर्थेषु नि सदा ॥ गणेशानं भजंते नेपरस्परहितेरताः ॥५॥ नानारूपाणि ते सर्वे महोदरस्थलानि
च ॥ त्वेष्टितानि स्मरंति वै हृष्टरोमाण आभवन् ॥६॥ सिद्धिबुद्धियुतंतं ते मूषकं पुरतः स्थितं ॥ पूजयंति
विशेषेण दूर्वादिभिः प्रजापते ॥७॥ तत्र महोत्सवो मुख्यो भाद्रशुक्लचतुर्थिजः ॥ भवति वर्षमध्ये वै
भक्तायात्रां प्रकुर्वति ॥८॥ तस्य महोदरस्यैव दर्शनं निनमने प्सितं ॥ लभते मानवः सर्वं स्मरणेन
तथा विभो ॥९॥ क्षेत्रे मरणतो दृष्ट्वा ब्रह्मभूतो भवेन्नरः ॥ अष्टौ विनायकाः प्रोक्तास्तथांक्षेत्राणि स
र्वदा ॥१०॥ क्षेत्रभूत मया नित्यं तेषु सर्वेशिवादयः ॥ संस्थिता मत्किकार्यार्थं स्थानत्वे विबुधैः सदा ॥११
त्रैलोक्ये अष्टरूपा येशेषा रयङदाहृताः ॥ ते सर्वे निवसंति वै क्षेत्रे ष्ट सुनिश्चितं ॥१२॥ तत्र गणे
शतीर्थं च महोदरस्य प्रीतिदं ॥ स्नानमात्र कृतेनैव पुमान्सर्वार्थसिद्धिभाक् ॥१३॥ विष्ववा[illegible]दि
षु तथान्येषु तीर्थेषु च विशेषतः ॥ गणेशक्षेत्रे गेषु वै स्नानमात्रणदेहिनां ॥१४॥ तच सरद महानि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मो० स्मृतो यामं ते प्रजापते ॥ ब्रह्मभूता भविष्यंति स्थानं दृष्ट्वा सकारिणः ॥१५॥ अन्यदेवस्य भक्ता ये क्षेत्रे गा २०
१३८ णेशके मृताः ॥ तस्य देवस्य लोके ते गमिष्यंति न संशयः ॥१६॥ महालये त्रयोदेवालयं गच्छंति चेत्प्रभो
॥ तदा ते निर्जले केवै गमिष्यंति सुखप्रदे ॥१७॥ क्षेत्रे मरणसंस्काराद्ब्रह्मभूता भवंति च ॥ अतो नरेण
न कृत्वा गणेशं सेव्य मादरात् ॥१८॥ यत्र कुत्र स्थिता भक्ता महोदरं भजंति ये ॥ ते सर्वे ब्रह्मभूता
वै ज्ञातव्याः पावना नृणां ॥१९॥ भजनं ये शिवादीनां कुर्वंति जन्मजन्मसु ॥ तेन संस्कारयोगेन गा
णेशास्ते भवंति वै ॥२०॥ गणेशान्नपरं ब्रह्म कथितं सर्वसंमतं ॥ अतो गणेशभक्ता ये ब्रह्मभूताश्च
ते मताः ॥२१॥ इदं महोदराख्यानं कथितं ते प्रजापते ॥ सर्वसिद्धिप्रदं पूर्णं समासेन यथामति ॥
२२॥ यः शृणुयान्नरो भक्त्या श्रावयेद्वा पठेद्यदि ॥ अंते स ब्रह्मभूतश्च भविता नात्र संशयः ॥२३॥ ॥१६७॥
अनेन न समं किंचित्त्रिषु लोकेषु विद्यते ॥ सर्वदं मानवादीनां ब्रह्मादीनां च योगिनां ॥२४॥ व्रतानि वि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धिवत्स्नानाकरोतिमानवोत्तमः॥ अस्यश्रवणमात्रेणतत्फलंलभतेप्रभो॥२५॥नानातीर्थेषुयःस्नायात्व
र्चयेद्देवताह्निकान्॥यथाशास्त्रविधानेननरस्यश्रवणाल्लभेत्॥२६॥क्षेत्रेषुभक्तिसंयुक्तोवासंकरोतियो
नरः॥विधिवद्धर्मशीलस्तस्यादस्यश्रवणाल्लभेत्॥२७॥यज्ञैर्नानाविधैरीशंयष्ट्वादेवान्यथार्थतः
सम्यक्तत्फलंलभतेपुमान्॥२८॥बहुनात्रकिमुक्तेनसर्वंयत्फलंलभतेमर्त्यस्तदस्यश्रवणात्फलं॥२८॥इ
ष्टापूर्त्तादिकंसर्वंयःकरोतिनरोत्तमः॥अस्यश्रवणतःसद्यस्तत्फलंलभतेपुमान्॥२९॥बहुनात्र
किमुक्तेनब्रह्मभूतपरंभवेत्॥श्रवणेननसंदेहोधर्मार्थकाममोक्षदं॥३०॥पुत्रपौत्रादिसंयुक्तंधनं
धान्यंविशेषतः॥राज्यमश्वादिकंसर्वंलभतेश्रवणेनच॥३१॥महोदरस्यमाहात्म्यंगृहेसंलिखितं
भवेत्॥नतत्रराक्षसादिभ्यश्चौराग्न्यादिभयंभवेत्॥३२॥ज्वरादिरोगादिकापीडानश्यतिपूजनेनच
॥पुस्तकस्यास्यमोदस्नात्रकार्याविचारणा॥३३॥इच्छन्तिजंतवोयंयमस्यश्रवणकारकः॥तंतंददा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

घो०
१२८

विसुप्रीतोमहेश्वरःप्रसन्नोभवान्॥३३॥वाञ्छकंपरिमोक्षेवलभतेनक्षणा॥३४॥गणेशसन्निधानेस ८०
श्रवणेननसंशयः॥३५॥पतितउद्धरिष्यंतिश्रवणेनर्स्यनिश्चितं॥किंपुनर्भाविसंयुक्ताब्रह्मभूताभवं
तिचित्॥३६॥नानेनसदृशंकुत्रवर्ततेब्रह्मगोलके॥साक्षाद्योगपतिर्यत्रवर्ण्यतेसमहेश्वरः॥३७॥इति
तेकथितंसर्वंसंक्षेपेणमयाद्य भो॥महेश्वरस्यमाहात्म्यंश्रोतुमिच्छसिकिंपुनः॥३८॥सूतउवाच॥
एवमुक्त्वामहायोगीमुद्गलोविरराम ह॥तदेतत्कथितंसर्वंमयात्तेनात्रसंशयः॥३९॥सर्वमान्यंविशे
षेणमतहीनंमहामते॥वेदादीनांतथासारंसांतेयंब्राह्मणार्हं॥४०॥नानाशास्त्रपुराणानिमंथ
यित्वामहामुनिः॥व्यासःसंकथयामासमहात्म्यंब्रह्मपरंप्रभुः॥४१॥नगणेशात्परंब्रह्मनगणेशात्
रंतपः॥नगणेशात्परंकर्मज्ञानंनगणपात्परं॥४२॥सत्कागणेशमेवंयोनरःकर्मपरायणः॥ना ॥१२८॥
नत्रा(त्या)दिकंसर्वंसाधतिचेहसुनिष्फलं॥४३॥सिद्धिपतिंयदिह्यज्यसिद्धिमिच्छतिशाश्वतीं॥फलही

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ०
१९६

नस्वभावेननारकीजायतेनरः॥४४॥बुद्धिपतिंपरित्यज्य स्थिरबुद्धिर्यदीच्छति॥नयोगंलभते

सोपि भस्मनिप्रहुतंयथा॥४५॥सर्वधर्म्ज्ञोयमेकश्च सर्वादिःसर्वभावनः॥तंभजध्वंविरोधेणवे

दादिसंमतं द्विजाः॥४६॥कथितंसर्वसारं तेमहोदरकथानकं॥किंश्रोतुमिच्छसिप्राज्ञवदशौनक

तेनमः॥४७॥ ॥इतिश्रीमद्हंसेमौद्गले तृतीयखंडेमहोदरस्वचरित्रेश्रवणफलवर्णनंनामैक

पंचाशत्तमोध्यायः॥५१॥ ॥श्रीगौरीपतयेनमः॥ ॥श्रीगौरीपुत्रायनमः॥श्रीगणेशाय०

श्रीगजाननार्पणमस्तु॥ ॥ग्रंथसंख्या०॥२५५०॥छ॥ श्री॥छ॥श्री॥छ॥श्री॥

॥१३६॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry